स्य नकारनत्वे परसवर्णासिद्धत्वात्कुलत्वाभासो भाष्यासंगतिः। निर्देशेन च चयोगे कुत्वाभावो निपा
त्यते इति कुड्त्वादौ कुत्वं भवत्येव तदा नलोपस्य प्राप्तिरेव नेति तत्त्वं। उच्चारणार्थ इति। ननु तादित्वं
शास्त्रप्रयुक्तकार्यभागयमतो विशिष्यतस्य नो कासा उच्चारणे सहायसंपादनेन वर्णोच्चारणस्य चारि
तार्थ्ये विधेयेतदप्यागममात्रं कल्पिका नुसारात्सेवेति न तस्य लोप इति सूत्रस्थभाष्यविरोध इति बोध्यं। कु ११३
त्वस्यासिद्धत्वादिति। चोः कुरिति कुत्वस्येत्यर्थः। इदं स्पष्टप्रायसिद्धार्थकथनमात्रं। परत्वादिति। हल्ङ्याब्भ्य इति लो

दि लोपादिप्राप्तिः। असंनिहितत्वादिति। स्कोर्ग्रहणसामर्थ्येनेकाचो द्विरेवतस्तन्निवृत्तेर्निषादेरा
प्रकरणेन विरोधाच्च। एतेनात्रैव चर्त्वमिति कर्तव्यं तत्रैव यथा क्विन्प्रत्ययस्येति वक्तव्यमेवं च कुग्रहणं व्यर्थमि
त्यपास्तं। चोरित्यत्र तत्संबंधादत्र तदसंबंधाच्च। निष्फलत्वाच्चेति सिद्धांतिसंमतफलाभावादित्यर्थ
स्तु ध्वनयन्नाह। अतिव्याप्तेरिति। कुमषष्ठीकमिति। एतेनोपसर्जनस्य सविशेषणत्वसमासानुप ला
पपत्तिरित्यपास्तं। पदांते झलि च यो स्को संयोगादी तयो लोप इति न सूत्रार्थः। संयोगादित्वस्य पदां
तत्वस्य चैकस्मिन्नसंभवात्। तदपवादस्येति। सूत्रद्वयविहितात्त्विनपवादस्येत्यर्थः। तत्र मंत्रे इति स
त्रे उपपदानां धातूनां पृथक्पाठकृतं त्वे समुदायोच्चारणमलाक्षणिकानां निपातनार्थं तत्र श्वेतवहादि
कर्तृत्वानि सुपपदे वहेः कर्मणि प्रत्ययः। उक्थे कर्मणि करणे वोपपदे शंसेः प्रत्ययो नलोपश्च अस्य न लो
पेपि न रुद्धिः। उक्थशास्त्र दाशब्दस्य सामान्येन रुः सिद्धो न तस्य निपातनं क्रियते इति भाष्येण तत्र तदभाव
स्यापि निपातनात्तदा दाशदाने इत्यस्मात्पुरः पूर्वकात्प्रत्ययः कर्मणि दाशा आदेईत्वं चेति। वहियज्यो

१०२० रिति। टांसेरप्युपलक्षणमिदं। किंचोक्तभाष्याद् उश्वदटांसि उच्चारणमपि प्राथामसंगतं। नन्वडुल्लवि
४ धेयः। अनया। श्वेतवाः। पुरोडाश्येति पदांतविषये रूले रूपसिद्धेरिति भाष्यं। टटावतः परत्वाभावेनो दाना
पत्तौ श्वेतवो भ्यामित्यादावसिद्धापत्तेः। अत्र रत्नेरिति। ननु पदांतविषये वासरूपन्यायेन ण्विन्यप्राप्तिर्नि
पातनं चेदमुभयोरत एव करुणकरणे अयाइतिसूत्रस्यपाठः। अन्यथा उसंतेसस्पुवोरिति रूलेसिद्धे दी
र्घमात्रस्य निपातनात्तत्प्रकरणे एव कृतं स्यादिति चेन्न। उस्वकृत्यः। किं प्रयोजनं। अनया। श्वेतवाइति।
तन्न वक्तव्यं अवश्यं तद्वक्तव्यं उसारंभेपि संबुद्धौ दीर्घार्थं। तर्हि उस्त्वं वक्तव्यः उसापि वक्तव्यः श्वेतवोभ्या
मित्यर्थमिति भाष्यविरोधात्। अन्यथा ण्विन्पक्षे रूलार्थमपि तस्यावश्यकत्वेन संबुद्धौ दीर्घार्थमिति भाष्य
स्य निर्दलतापत्तेः। तस्मादत्र वार्तिकनये वासरूपाप्रवृत्तिः। कादिष्विव ण्विन्यविकल्पे विभाषयांगीकार्या। इमप्र
रणे सूत्रं न तु सूत्रकृता उसो ऽकरणात्। कृतेपि ण्विनं तेरूलमात्रस्यैव न दृष्टत्वात्। श्वेतवोभ्यामिति प्रयोगं तु ११
सूत्रकृन्न जानात्येवेति स्पष्टं भाष्ये विदां। केचित्तु ण्विन आदेशोऽडस् श्वेतवहादीनां डस्पदस्येति वार्तिकात्

एतत्संबंधिनो ण्विनः प्रत्ययस्य डस् तदंतस्य भावित्वे इतितदर्थः। अत एव वृत्तिकृता ण्विन्प्रत्ययस्य श्वे
तवा इत्युदाहृतमेवं च वासरूपस्यात्र विषय एव नेत्याह परत्वादिति। नित्यत्वं तु नाल्वस्य शब्दांतरस्य प्रा
प्तेः। सत्वस्यादिति। उभयोरपीति भावः। असौ लाक्षणिकत्वेनात्वसंतस्येत्यस्य न प्रवृत्तिः। नचप्रत्ययवि
धौ षापेक्षत्वापेक्षयांतरंगत्वाद्द्विरूपसिध्येदं व्यर्थं ताद्दृगंतरंगत्वस्य ह्यग्रस्तेः। नाश्रयणज्ञापनार्थ
त्वादत एव भाष्ये ईदृगमंतरंगत्वं न क्वाप्याश्रितं। पुनः प्रसंगेति। कृताकृतप्रसंगित्वमात्रेणानित्यता
यां साप्यस्त्येव। शब्दांतरमास्या नित्यत्वमभ्युपेत्य प्रवृत्तं भाष्योक्तं समाधिमाह। सत्वरिति। अ
नंत्ययोरिति एतदेवसकृद्गतिन्यायज्ञापकमिति तदाशयः। न्याय्यत्वादिति। अत एव वामनभिधान
मेव। एतदाशयस्य यथालक्षणमप्रयुक्ते इति भाष्योक्तेः। अस्यार्थश्चाग्रे स्फुटो वक्ष्यते उक्तः। द्विवचनोपपत्तये भा
हृद्यमस्पदमिति। अत्रागोरथंमतारकारांतरमाह। प्रथमाद्राड्ढ्इति। एवं च तस्येकृतात्ते द्विवचनं समा
सेद्विवचनमिति भावः। तस्यापीति। तस्येवेत्यर्थः। अंत्यलोपस्येवेत्यर्थः। अनेनायमेव पक्षः सूत्रसंमतः

१८० तिरूपितं। किंचद्गोषस्यलोपस्यार्थैफलाभाव:। अंसलोपेप्यस्यादिभक्तिसंनिपातनिमित्तकत्वात्संनि
पातपरिभाषयाकुत्वाविलक्षत्रेवटापो निरुक्तेः। गोषग्रहणंतुभाष्येप्रत्याख्यातमेव। सस्कृद्गुनिर्देशमप्रत्या
ख्यानंपिक्षया। स्यप्रत्याख्यानमेवन्याय्यः। पदादीनामदनिसूत्रभाष्योक्तोप्ययंपक्षस्तत्रैवगुरि
स्पष्टत्वावबोधितात्रविकारत्वस्यत्रनिरूपितं। अभ्यस्य। अंगवृत्तपरिभाषया। दीर्घाभविष्यतीति। नन्वनेन
दीर्घेपिचाभिमोदनिपदजानामोदवादवनंस्यापीतिप्लुतोनस्यात्। अत आदित्येवसिद्धेन
त्रत्यदीर्घग्रहणस्यप्लुतनिवर्तकत्वात्। नचानंत्यस्यपदस्येटेरितितदर्थोत्कथपचामी। पादोतत्या
स्त्रिरितिवाच्यं। दीर्घग्रहणसामर्थ्येनात्यविषये एव तत्संबंधात् वाक्ययो: कृतसंबंधस्यागमानाभा
वात् तेन वाक्यस्यानंत्यस्यपदस्यप्लुतःस्यादंत्यस्यपदस्यनटेरित्यर्थ:। तपरकरणेनतुनप्लुतव्यावृत्तिः
प्लुतस्यासिद्धत्वात्। अतएवगीःपूरित्यादौदीर्घः। अन्यथातस्यापीदुदितितपरत्वसामर्थ्यादप्रप्ल ११५
त्यापत्तिः। दीर्घग्रहणेतुतत्सामर्थ्यादसिद्धत्वस्यापिबाधः। आकारांतरप्रश्लेषेणवारणंतुक्लिष्टं। अ

अन्यथा भ्रमम् ...स्येदितिपरस्येबांगीकारेणशंकाया निर्दलत्वंस्प

त्वाभावादुपायांतरमितिचिन्त्यो। नत्वापकपरभाष्यत्रामाण्यादप्लुतस्यतत्रानिष्टत्वेवैकल्पिकत्वेनेद
शोविषयेप्लुतावृत्तेः। अतोदीर्घइत्यत्रदीर्घग्रहणंहलिलोपइतिसूत्रेहल्यइतिपक्षेल्लोपग्रहणप
त्वत्वेननार्थसाधकमितिदिक्। निर्देशेनेति। अन्यथात्यसाधले एत्वंनस्यादितिभाव:। वाचानिकु
त्वेगौरवंआपकत्वस्येदोथिल्यंचापरिहतमितसतआह अनित्यत्ववलेति। अनुवृत्त्यर्थमिति। स्पष्टमे
तद्भाष्येत्रैव। अभ्यामितिछेदस्यैव मुख्यत्वंध्वनयन्नदंकृते। नन्वेति। अतएवयुष्मदस्मदोरितिस्
त्रेनचादेशोहलादिरस्तीतिभाष्यंसंगच्छते। एत्वमिरत्वेति। अंगवृत्तपरिभाषाऽनित्यत्वबोधनाद
इतिभाव:। एवंचपररूपेणबाधान्नसवर्णदीर्घइतितात्पर्यं। वैयर्थ्यमिति। अकारस्याकारविधिवैय
र्थ्यंनांत्यस्येआकारेऽतोगुणेचसिद्धत्वविवादीतिप्रथमेवद्वित्वमित्यर्थ:। ननुपररूपबाधनार्थमे
यादेरत्वविधानंस्यात् इति वाच्यं। विधिबाधापेक्षयाऽदेःपरस्येतिपरिभाषाबाधस्यन्याय्यत्वात्॥
आदेशेति। आदेर्विधानेपादेशात्वसंपादनेनयत्नगौरवस्यादेशेयेलोपार्थमकारविधानंचरितार्थमिति

१० आदेः परस्येत्यस्य बाधेमानाभावेन सर्वादेशत्वं सिद्धमिति भावः । ननु यो न्यङ्सीत्युक्तेर्थे व पत्वनिरासस्तु ज्ञापो
सिद्धावितिवाच्यं । पर्युदासे एकवचनत्वादिना सादृश्य ग्रहणापत्ते । युष्मदस्मदोरित्यालस्य प्रालेश्च । हल
दाविति निहि पदिङ्गोयासिद्धोर्थ स्तत्रेति भावः । अनादेशात्स्सेवेति । अनादेश इति हि तत्सुरूपोलाघवात् ।
एवं चत्वमहमित्यादौ संपूर्णविभक्त्यादेशेय त्वाभावसंपादकमनादेशग्रहतीतिन्न हते यत्वं स्यादेव । ननु
वमादेरकारस्य विधानं व्यर्थमितिसामर्थ्यादस्य स्यात् । तत्र चातो गुण इति पररूपे आदेशरूपाविभ
क्तित्वमिति यत्वापत्तिः । नच धार्णादागमिति परिभाषया पररूपात्स्वं यत्वप्राप्तिरिति वाच्यं । भार्णागयोरे
करूपाग्निकत्वेरेव धर्मिग्राहकमानेन तत्वासिद्धिरिति चेन्न । युष्मदस्मदोरनादेश इत्यत्र प्रत्यासत्त्या युष्मद
दिग्रहणे । न विहि तादृशरूपविभक्तेरेव ग्रहणे नो सादेशे परत्वेपि तादृश विभक्त्यभावेन यत्वापत्तेर्दु
र्वारत्वात् । पररूपादेशस्तु न तथेति भावः । सर्वसर्वेति । स्पष्टं चेदं भाष्ये । एवं चाकारविधानेपि यत्व व्या ११
वृत्त्या तस्य चारितार्थ्ये नादेः परस्येति एतद्बाधेमानाभावेन सर्वादेशार्थकमिति भावः । अत्र पदशब्देना

श्रीसंसारार्थ

र्थवद्ग्रहणं त्याह । अर्थवत्त्वेचेति । अर्थवत्त्वं च कल्पितमेवाऽऽदृयते । एतेन रूसादत्यस्य हृयदसादेशो
प्रकृतिप्रत्ययसमोहे हृस्वस्येति तुगस्यादित्यपास्तं । सिमादीनां कल्पितोप्यर्थो नास्तीत्यत आह । सि
भ्यसादयश्चेति । द्यो त्यार्थेन सोप्यर्थवानित्यन्ये । दुग्ग्रहइति । भ्यादादीयसद्भावस्य ज्ञापकत्वपरभाष्यवि
रोधादस्य दुराग्रहत्वं । अकारांतत्वा आमइति । सस्कृद्धनिर्देशाभावइतिशेषः । निर्देशसामर्थ्यादिति ॥
अयंभावः साम्नः प्रसंगे आद्कमिति सूत्रार्थस्तेन आम्सकारस्योदत्र विषयेऽत्यंतमप्रयोगो बोध्यते स्व
न्यादेशाभावविषये सर्वत्रैवमेव । यथार्धधातुकविषये अस्तेरप्रयोगे भुवः प्रयोगश्चास्तेरित्यनेन प्रतिपा
द्यतेनतु सतो निवृत्तिः शब्दानित्यत्वप्रसंगात् । किंतु प्रसक्तबुद्धेरेव निवृत्तिः । तत्र सकारबुद्धेः प्रकृते सां
प्रतिक्या असंभवाद्भाविन्याग्रहणं सकारोच्चारणसामर्थ्यादिति भाष्ये स्पष्टं । तन्निवृत्ति श्चामोऽभा
वात् । अत्र साम्नः स्थानितोक्त्याऽकमिस्थानिपत्वेन साम्त्वमेव न त्वाम्त्वमत एवाऽऽतित्वाऽकमित्यादौ न
स्पयोत्तरपदयोरिति सूत्रभाष्योदाहृतेआकमुत्तुभावोऽसिद्धो । आम्येवसाम्नस्याहार्यारोपेणादेशः । आ

सू.र. देशस्यामत्वाभावान्नात्र ननु द्विति। न च यत्र भावी रूढ़ तत्रैवायं। सामी भाविलस्य सर्वथा दुरुपपादत्वादि
७ ति भाष्यविरूद्धकल्पनमर्थ्यर्थे तिदिक्। कितर्थपरा इति। आख्यानमत्रद्वारणं। द्वयोरेकस्य भचने बोधने स
मर्थयोर्युष्मदस्मदोरिति वाक्यार्थः। भूतत्वेति महत्स्वार्थ इत्यभिमानेनेदं। सामर्थ्यादेव तद्बाधादिति
। उभयगाति विहद्वास्त्वे भवतीति संख्यासंशास्त्रत्रस्त्र भाष्योक्ते श्वेतितत्वं। अन्यथा द्वयोरेकस्मिन्निः स्मृत्यै
बयुष्मदादि विशेषणतया सिद्धे वचनग्रहणसार्थक्यं दुरुपपादमिति बोध्यं। भावादिति। आकृष्टत्वे
कार्ये त्यलोपाभावेन सुदो सत्वादिति भावः। नैवेतद्वाणत्विरुगति। सर्वनामत्वाभावादिति भावः। योग्य
तावलाच्चेति आत्ममभिव्याहृते युष्मदस्मदोतस्यैव संभवादिति भावः। साहित्याभ्युपगमादिति। स
र्थः। म्हाभ्युपगमादिति। सहितेति। तभ्योक्तिद्वन्द्वनिषेधादिति भावः। उभयत्र तुल्येवेति। एवं च पूर्वमाम आ
कमितत सूदितद्विशिष्टस्य पुनराकृष्टत्मे। गौणेत्वामए व। सूत्रे सकारग्रहणञ्च सद्विशिष्टपरमिति
भावः। एवं परोक्तसमाहारद्वन्द्वे गौणे आकममुपपाद्य सत्पदस्य सद्विशिष्टे लक्षणामसहमाने तादृशेर ११

23४

न्येरुक्तं भकारांतरमपि स्वरूपमाकृष्यैव पराकृष्येति न्यायेन दुष्टमिति बोधयन्ननुवदति। भक्तांतरत्वा
दिना। फलेत्यमिति। तत्पक्षेऽपि प्रथमभवस्यैव पर्यवसानादिति भावः। सिध्यतीत्यस्यैव त्वदीयेरुक्त
मितिशेषः। एतेन सामदस्याम्यदेन न तन्त्रमसारूप्यात्। सारूप्यस्यैव तद्बीजतया हर्यादिभिरुक्तेः। पूर्व
तंत्रं कृत्वा लतः सपदेन समासेउभयोरपि तत्संबंधबोधापत्तेः। किंचैवमपि गौणे तु द्वारस्थितु मनराभ्रयः। न
चामासगृहीतस्याम स्याकर्मित्यर्थः। गौणे तु द्वितत्त्वहितस्याप्याकर्ममिति भाष्यं। प्रथममरम्ये वे सोदस्स
गत्यापत्तेस्तत्वेएवमर्थस्य निरूपयितुमशक्यता च्चेति नरूक्तताल्लि साधुक्तिरसंगते त्यपास्तं। अस्यापि ग्रं
थस्य परमतानुवादत्वेन दुष्टत्वेप्यदोषात्। तदनुवादफलं च तेषां परस्परविरोधप्रदर्शनं तदेतत्सकलं ध
नयन् परमतदूषणमुपसंहरति। सर्वथेति। अत्रानुष्टोनिवृत्तिरुक्ता दूर्बलपपादितेतिदिक्। ननु पदस्येत्य
धिकारेऽपि युष्मदादिपदस्य विभक्त्यादिविशिष्टस्यापि व्यामादोसंभवाद्विशिष्टयोरित्यर्थलाभः षष्ठीद्
तीययोरसंभवेन पदावयवयोरित्यर्थलाभेऽपि लड्डुकार्थेन मानं। नन्वपदावयवत्वस्याव्यभिचारित्वेन तद

235

१० तुरक्तिसामर्थ्यात्तदर्थलाभः। तदनुवृत्तेरुत्तरत्रावश्यकत्वेनसामर्थ्यायोगादतआह। सर्वस्येति। तत्सा
मर्थ्यात् युष्मदाद्यवयवैकस्यसर्वस्यपदस्यैसर्वैइतिभावः। अतएवयुवाभ्यामित्यादौ प्रकृतिभागस्यन॥
असहायएवत्वमित्यादिरिपद्भावप्रवृत्तौ युष्मदाद्यवयवत्वाभावाच्च। एकार्थविवचनन्यायेनसमुदाये
एवतामवृत्तेश्च। अतितवेत्यादीमांतुमत्तेरत्याद्यादेशाः। षष्ठ्यादिःप्रकृत्याकांक्षायोग्यासत्याश्रूय
माणयुष्मदादिप्रकृतिकस्यैवग्रहणेनादोषात्। तेनैवकारणेनेति। श्रोतृकत्वेतेनेनाभिक्तत्वेहेतुकथ
नमितिभावः। विधेरिति। सचाज्ञातज्ञापनरूपोननुप्रवर्तनारूपः। दिगिति। तदर्थलाभत्वेहेत्वाकां
क्षायाअभावः। आणेआकांक्षितहेत्वर्थकस्याध्याहारेसापेक्षत्वतवापिदुर्वारत्व। इत्यर्थमर्यादयातेनेस नि
स्यैत्राणएवान्वयप्रतीतेः इत्यर्थमर्यादासागस्थेति। नवेति। त्रायतइत्यस्य हरिस्त्वामित्यनेनशब्दान्वयः।
समाप्तिस्त्वत्राध्याहारः। वैपरीत्यंतु नाध्याहारस्यानुपपत्तिमूलकत्वेनोत्तरत्रैवयुक्तत्वात्। किंचाध्याहत
स्यांगत्वामंते निराकांक्षइति न्यायेन। अतएवनिर्देशेनसमाप्ति [illegible] स्यतदर्थंकृतमित्यस्यैवाध्याहारपदार्थंत्वेन
चेसदृशस्यविद्यमानपूर्वकत्वाभावः श्रूयमाणत्वेनसमानवाक्यत्वमितिभावः। अनुषंगेति। अनुषंगोहि ११८

236

तत्सजातीयवाक्यांतरकल्पना उपात्तस्यैवतदर्थंकृत्वंवा। तत्रोपात्तस्यान्वयाभावेनसमानवाक्यस्थत्वं दुरुपपा
दमितिभावः। एकतिङितिः। एकवाक्योहि तत्रसमानवाक्यत्वमितिभावः। केचित्तुपूर्वस्यैवेति। अदसोद्रेःपृथङ्मु
त्वमिति। पृथग्ग्रहणं तेनकदाचित्सर्वस्यैतितद्दाशयः। उपेक्षितमिति। केचिदित्यसदेशस्यैत्यस्य वैयर्थ्यापत्तेश्चे
त्यपिबोध्यं। विभज्यतइति। तत्रचासंतस्यैत्येकदेशस्येतिलप्रतिज्ञानात्तावतएवतत्रसंबंधइतिभावः। अतुइति
धातुस्तस्यकिंपदं। केयटइति। उगिदचामितिसूत्रेइतितेनेदमुक्तं। इत्यनुवर्त्यैवेति। अनुवर्त्तनचत्वेभ्यासइ
त्यादावित्यातुवारामितिभावः। समुदायेति। गर्गाःइतिअंतांमित्यत्रैवेतिभावः। अन्यथाब्राह्मणभोजनन्या
येनप्रत्येकसंज्ञास्यादितिभावः। अन्यथाप्रत्येकसंज्ञायां। अभ्यस्तानामिति। आनिष्ठिअजादौलसार्वधातुके
भ्यस्तानामादिरुदात्तइतितदर्थः। इतिआदिरिति। आदिशब्दःपूर्ववर्तिवाची। आप्येतुकर्मकर्तरि अलाभिर्द
र्शितेतिमितिभेमपश्यंतिभक्तामनाः सोयंसद्भवइश्यमानत्वमितिआत्मानंपश्यतीतिभाष्येउक्तं। तत्राध्या
रोपितप्रेषणकर्मकर्तर्यपिसोकर्मायत्नस्यतिदर्शयति। तमिवेममितियादि। अत्रपक्षेकर्मणीअधिकारबाधः
सामर्थ्यादितिबोध्यं। सर्वस्याविसर्गस्थानिकसस्य। अस्मिन्नंश्यंगतलापे। पूर्वसूत्रमंतरेणाप्याधिक्येतिभा
पक्षेकर्मकर्तृत्वंपश्यतीत्यस्यचदर्शयतीत्यर्थइतिस्पष्टमेव। तत्राधिकार्यत्वादर्शनार्थत्वबोध्यं। निरस्तप्रेषणे

237

कः। पदसंज्ञासापेक्षत्वेनेति। बहिर्भूतस्य निमित्तस्येत्यादिः। तदपेक्षया बहिरपेक्षत्वरूपं बाहिरंगत्वं न बलमिति
भावः। प्राबल्यमिति। पूर्वं पूर्वमंतरंगमित्याश्रित्याल्लोपासिद्धत्वेनेत्यादिः। अनिर्दिष्टेनेति। विभक्त्याश्रयस्ये
दृशाविकृतन्यायेन नभस्येत्यर्थः। लक्ष्यपूर्वभागे इति। काव्यादिशब्दरूपलक्ष्यस्य पूर्वभागे या घृते इत्य
र्थः। बहिर्भूतेति। बहिर्भूतनिमित्तापेक्षत्वरूपबाहिरंगत्वस्येत्यर्थः। नस्कृतस्तेषामनभिधानमेव पूर्वपूर्व
मित्यस्य च पूर्वपूर्वनिमित्तकमित्येवार्थ इत्यन्यत्र प्रपंचितं। दुर्लभ इति। पञ्चादस्यत्वाश्रयेति भावः। स्थानि
वद्भावेनापि सिद्धेरिति। ङित्त्वादिति भावः। ननु तदनुबंधकमेव इत्यर्थं ×परिभाषा× मेव तत् निरनुबंधकत्वे
नापि तत्सिद्धेः। कथंचिदिति। तेन पदस्येति सूत्रे छंदसीति निर्देशः कल्पनया तस्य चारितार्थ्येन एतद
र्थं ज्ञापकत्वासंभव इति सूचितं। प्रागेवेति। अंतरंगत्वादिति भावः। निवर्तयिष्यत इति। अकृतव्यूहपरिभा
षया पूर्वमेव न प्रवर्तयिष्यत इति भावः। अंतरंग इति। अकृतव्यूहपरिभाषाया नास्येवेति भावः। तदेवाह
वैयर्थ्येत्यादि। भाष्ये पुंवद्भावविधानवचनं कर्तव्यमित्युक्तं। अकृतव्यूहपरिभाषाया इति। सत्वे इति शेषः। न

236

न्वेतदिति। अंतोदात्तत्वधारणाय निष्करणसामर्थ्यात् श्रयणमित्यर्थः। पित्स्वरस्येवात्राप्राप्तेरिति भावः
इदं दुःस्पृशो नित्यं। यद्यप्यसिद्धमिति। नित्याभावेपि किंचोत इति कर्तव्ये अस्कृते बहिरंगस्यासिद्धत्वात
[illegible]स्वरेणोकारस्योदात्तत्वे एव स्थितेस्ततो मुडनुदात्त एवेति भावः। निष्करणमिति। सुबंतत्पक्षे
इत्यादिः। उडुपिताविति। लोपे तरे ज्ञसंज्ञा [illegible] प्रयुक्तकार्यार्थमिति भावः। तेषु नयन्त [illegible]
ताह। [illegible] कार्यार्थ इति। इत्वप्रसंगादिति। न चैवमपि धायके आ आपीति प्रकृते [illegible] निर्देशान्नेत्वं। कारिके इत्या
दापीत्वानापत्तेः। तस्मात् प्रश्लिष्टनिर्देशो नात्रेत्यन्येव भाष्ये स्पष्टं। एतेन विभक्त्यविषयस्य पदादी
नामप्यविषयसप्तमीत्वमपास्तं। एवं हि विभक्त्युत्पत्तेः पूर्वं स्वदादायत्वेदापि सावदसरत्वे इत्यस्यो
त्वेपि रुत्वानिवत्वे नाप्त्वादित्वापत्तेः। निर्दिष्टपरिभाषायां संसां विषयसप्तम्याः [illegible] तिदि
क्। न्याय्यत्वादिति। क्वचित्सांतत्वेन युक्तामात्तेः क्वचित्सत्वेन बाधादिति भावः। नस्यादिति। इनादिष्टागुणे
वस्यातामित्यपि बोध्यं। हदिनिसस्येति। तदर्थमित्यादानतो रोरित्यस्य चारित्यर्थमित्यपि बोध्यं। एवं
च योगविभागेनासिद्धत्वाभावेन। अग्रहणेनेति। अनयकृत्यं तदुक्तं प्राक्। इति हलंताः पुंल्लिंगाः।

तत्रैव चरितार्थत्वादिति। [illegible] सर्वादेशाः। २

239

२ ननु संनिपातपरिभाषया न तेन स्यादत आह। अथवेति। धलेकृते संनिपातपरिभाषाया अनित्यत्वान्नद्रूमि
त्यादौ नङ्लं बोध्यं॥ इति स्त्रीलिङ्गाः। अप्येवेति। औङ्गसादिष्वनेनैव सिद्धिरिति भावः। स्यदाद्यत्वेनेति।
न च येन नाप्राप्तिन्यायेनैनद्रूपस्य दाद्यत्वापवादत्वेन तत्र कृते कथं स्यदाद्यत्वं। न चोपसर्जने एनच्चारितार्थः
स्यदाद्यत्वेन सिद्धमिति भाष्यासंगत्यापत्तेः। एनदेशोप्युपसर्जने एतदस्त्रतसोरिति साहचर्येणाप्रवृत्तेः
स्वीकारात्। न च नपुंसकेपि तच्चारितार्थ्यं द्वितीयादिग्रहणस्यैवमप्यचारितार्थ्यादिति वाच्यं। आर्धधा
तुके इत्येतत्साहचर्येणास्याप्यद्वितीयादिविषये पूर्वमेवाप्रवृत्तेरित्याशयात्। एतत्सर्वं भाष्ये स्पष्टे
नाक्रियत इत्याद्येकदेशयुक्त्या ध्वनितं॥ स्वमोर्नपुंसकादिति। तद्विषयेन लुमतेति निषेधबाधेन चारितार्थ्येन
बहिरंगलुग्विषये तद्बाधेन मानमिति भावः। वस्तुत एतत्सर्वमत्रत्यैकदेशानुरोधेन तत्कारोच्चारणसा
मर्थ्येन नपुंसकलुकि भात्रापि सामर्थ्यादेवेन प्रवृत्तेः। न च बहिरंगत्वं लुग्विषये बहिरंगपरिभाषाप्रवृत्तेः
अत एवैनदादेशो एनच्छ्रितक इति नास्ति ध्वाति एतच्छ्रितक इति प्राप्नोतीति भाष्यं संगच्छते एनद्विधाने ने
तत्कृत्रविषयेन लुमतेत्यस्याप्रवृत्तिरिति तदाशयः। एषामनभिधानमेव। अस्यां कारिकायां यथालक्षण

मप्रयुक्त इति भाष्योक्तेः। विषयसप्तम्यां मानाभावेत्वेनैन तौ एश्वयकस्याधिकपाठः। अच परइति। नपुंसकस्येति
सूत्रे ऽन्यग्रहण सामर्थ्येनास्त्रया च तू त्यस्य सत्न्तूविशेषणत्वमन्यथेतौ तामान्ति के वीलेपसि प्राए अंतेषु नपुंस
कस्त्वेन चाकारग्रहणमेव कुर्यात्। आद्यनौ मानं च दोषडना पन्नेति सूत्रे हिरण्मयानीति निर्देशा एव कार्षातं क्षी
त्यादौ सत्त्वभानेरचः परत्वाद्भवत्वेव नुम् कर्तृदा काद्दो नुनेति भाष्यस्तदग्रहे नमिति। एतेन पुनर्दाश्च नपुंसकेरोऽन
पुंसकस्येति पुनेरेति चतुर्म्नयमित्यपास्तं। सुनेरित्यस्य नित्यत्वाच्च रे भवतो अचः परसत्तोभावे न नपुंसकस्य
त्यस्यात्प्रसेः। वस्तुतस्तु ऊरादिः क्विपि नपुंसके नुम्विषये ऽनभिधानमेव वार्तिकस्तु दोधाद्यन्यथाभाष्यवार्तिकयोः
भेदापत्तेरित्याकूतं। आमहति। दीधीवेवीटामिति सूत्रे न पदांत सूत्रे च भाष्य कैयटयोरिति स्पष्टः। सम्पर्कननिति
तत्स्त्रसंमंदप्रयोजनं। चतुरनडुहोरिति। पूजार्था नांत्रयाणां नद्वित्वात्तस्मानो मनुनासिकस्य विकल्पत्वात्। चतुर्णि
[illegible] इति। अनाभ्वर्ति वर्णविसर्गद्वित्वादि सर्गतु नानुनासिकः। अमनुष्यस्येति पर्युदासे नास्यि हस्समात्रा
विक्षेपत प्रवृत्तेः। इदमो मिति। प्रकारद्वित्वं त्रयः स्वयद् त्वमनेन। भाष्यन्याति रिक्तमतदृति। भाष्यमते ऽचः
परोऽप्यो सम्यगेव प्रत्युत न प्रकृते नः परसत्वदा तो रभावान्नुमो प्राप्ते रेवं चतान्यसाधुत्यैवेति भावः [illegible] अप
प्रभाभावादिति। नियमेमानाभावादिति भावः। अप्रामादिकमिति। [illegible] इति हलंता

पृ०४० नपुंसकलिंगाः।इत्यादिभिरिति।आदिनातत्रतस्यैवतदर्हे।इत्येकदृति।अत्राहमिबीजं।इमेमितिइत्यत्र
३ तिविहितस्यतद्धितश्चेत्सनेनासिद्धिः।काम्यस्यपाइति।विहितात्परस्याभद्व्यनेनखुनित्सप्रातन्य
तस्यतत्वेकत्वाभावइति।अनुपसर्गत्वादिति।अवदत्तंचेत्यादिभाष्येतकाराकरणेनसुपभृतोपसर्गत्व
बाधोबोध्यतइतिभावः।यदभीति।स्वरादीनुपकभ्यादात्ताः पश्चात्इतिकाशिकायां।ग्रामादिकमिति।न्ये
इत्यस्मिन्स्वरितावित्ति किदत्त्रेणस्वरितत्वात्सनाम्बहोतानव्यः तिरःपुरुचिदश्विनेत्यादौसनातिर
सोरंतोदात्तपाठाच्च।निर्मूलत्वाच्चेति।आद्युदात्तप्रापकइत्यस्याभावादितिभावः।सिद्धांतादितिअ
न्यथायेनयगभावइतिभावः।अनयग्रहणमिति।मेभ्यांकृतोविशेषणात्तदंतलाभेसिद्धेइत्यादि॥
लक्षणेति।क्वचिद्वर्णग्रहणेपितत्परिभाषाप्रवृत्तिस्तत्राप्रवृत्तिज्ञापकंसदनित्यत्वमात्रज्ञापक
मितिभावः।भूतानियमानिति।भूतइत्यर्द्धःपोतन्यदृत्तिर्नित्यनपुंसकस्तत्रपर्मन्पवल्लक्षणप्रद
र्शनतंत्रत्वात् [illegible] स्त्रीद्वांतरसंनिधानोत्तरं ह्यपिलक्ष्येस्येलक्षणस्येतिन्यायेन
पुनर्नह्रस्वइतिभावः॥ ॥इत्यव्ययानि। ॥इतिमनोरमाव्याख्यानेशब्दरत्नेषड्लिंगप्रकरणं

282

अनुपसर्जनाधिकारेणचेति तस्यहिबहुकर्तृचराव्यावर्त्य एवंचबनोरन्वेर
सत्रेषात्रापितदंतविधिरितिभावः आतिसातपीयादिति कुनादिविधौसंज्ञापरे
नरूढिरेवगृह्यतेनतुशब्दप्रवृत्तिनिमित्तकत्वरूपसंज्ञात्वंगृह्यते अतएवचद्रः
संज्ञायामित्यादि [illegible] नाच्याघ्रादिसिद्धिरितिदिक् गौणीवृत्तिरि
ति लाक्षणिकत्वापरपर्याये गौणत्वमिति स्वाभिमानेनेदं सदृशलाक्षणिक
स्ति त्वमेमर्थ्यत्वमिव वागौणत्वंगौणमुख्यन्यायश्चपदकार्यविषय [illegible] मिति
सिद्धांते जातिरित्यानस्यकामितिबोध्यं जायतरे इति ब्राह्मणादुजातिकन्या
यामुत्पन्ने आभीरजातौ इत्यर्थः नृपात्शूद्रायामुत्पन्नोयं जातिकन्यानतुशू
द्रत्वंतत्रास्ति अतएवशूद्रसधर्माणस्तेइत्येवस्मृतिषूक्तं नतुशूद्राइति इ

283

घृतस्येवेति अत एव च आवृत्यर्थं नेतदिति भावः भाष्यवार्तिककारौ तु शूद्र जाति
वृत्तिमत्वेन तां जातिं तत्रारोप्य शूद्रशब्दप्रयोग इति शूद्रशब्दार्थे समवेतस्त्री
त्वस्य सत्वादस्त्रीत्वं वद्वापः प्राप्तिरित्यमहत्पूर्वेति शूद्रशब्दार्थसमवेतस्त्रीत्वेपि शू
द्रशब्दादेवटाप्स्यात्तु तदन्तादिति तदन्तविधिज्ञापकेनापि भाष्योक्तानां सं
गता अत एव शंखेन मादृत्यारोपेणैव ब्राह्मणक्षत्रियवैश्याः क्षत्रिया वै
श्याश्शूद्राः सृस्रा क्षत्रियवैश्यशूद्रा एवेत्युक्तं तत्र जातिरित्यस्याभावेपूर्व
जातिमात्रविवक्षमा कुक्कुटी उवत् शूद्रशब्देन समासे ततः स्त्रीत्वविवक्षा
याम महत्पूर्वेति निषेधेन टाप् न स्यादिति मन्यते इत्यन्यत्र विस्तरः। धुसादि। तस्येति॥
त्यासकृतेति शेषः इदं धुसादन्नमप्रमाणिकं अत्रत्यभाष्यासमतेः दधातेः १२२

कृ नित्विति घुमास्थेती त्वयावानिदत्यस्य वनिपा सिद्धिमाश्रित्य ईत्वमवकारादावि
त्यस्य तत्रैव भाष्ये प्रत्याख्यानात् स्थः क्वेति सूत्रभाष्यस्थेयं स्थाइत्यत्रावेति सूत्रभाष्यस्थे
सव्येष्ठा इत्यत्र च [illegible] स्यसि जिस तो वा ग्रहणं मंडूकप्लुत्यानुवर्त्य व्यवस्थितविभाषाश्रयणं
दृभावः तत्र विद्यते स्पन्येः अत एव धीध्यायतेर्दधातेर्वेति ध्यायते संप्रसारणमिति वार्तिकस्थभा
ष्यसंगच्छते घुमास्थेत्यत्र हलीत्यस्यानजादावित्यर्थो लस्यपलक्षणसूत्रस्य नियमार्थत्वेपि त्र
त्यल्लक्षणकार्यस्याभिन्निरिकुनिषेधानेन विवनो न हत्राइ नि वार्त्तिके विहितविशेषणस्य
द्मेव फलमिति भावः नखेतदिति अतोप्रमाणमेतभाव व्याख्यानमिति उपदेश इति
वत्कव्यमिति वदतो वार्तिककारस्येति भावः आनुमानिकोपीति एरु रिष्वनेन लोपरनुमा
नादिति भावः एतव्याकरइति अत्रारु चिवीजं नुषद्दित्वं नास्थमेर नित दाश्रयविधीनां ना

त्विधित्वमितिसिद्धइतिएवंचान्यतरस्यांग्रहणंकिमर्थमितिभावः।ङीपेतिऋन्नेभ्यइति
विहितेनङीनायोसौविकल्पइतिअन्यतरस्यामितिविभक्तसूत्रेणप्राप्तइत्यर्थः।अनइतिसू
त्रेप्यन्यतरस्यामित्यस्यसत्वाद्विकल्पनियमलाभोन्यथासन्नित्यार्थोविधिरेवस्यादितिभावः
स्यादुपधेनिस्तउपधालोपिनोनुपसर्जनस्यबहुव्रीहेरेवेत्यर्थः।मितियोगविभागेनपक्षेप्रा
प्तस्यऋन्नेभ्यइतिङीपइत्यर्थः।सबहुव्रीहितिनियमशास्त्राणांनिषेधमुखेनप्रवृत्तिरित्यभि
मानेनेदं।तेनेति।अनउपधेत्यस्यनियमत्वेनेत्यर्थः।ऋन्नेभ्यइति।अस्यान्यथेत्यादिः।अनउपधेत्यस्यवि
धायकत्वेइतितदर्थः।प्रकरणांतरस्थेनेति।तेनानंतरत्वंबोधितं।गौरवादिति।ममतुऋन्नेभ्यइति
प्राप्तङीपमनूद्यतत्संनियोगेनरभावमात्रंविधायकंस्यादितिभावः।ननुवनोरचेत्यस्योभयविधा
यकत्वे।नोबहुव्रीहेरितिअनंतरत्वादस्यनिषेधकत्वमपिनेति।न्यायेनऋन्नेभ्यइत्यस्य।नाधइत्याह।
विनेति।अनउपधेत्यनेनङीप्यपिरोदुर्लभएवेतिभावः।विनैवबहुव्रीहेस्त्वत्रऋन्नेभ्यइतिङीबापत्तिः।

वेत्यबहुव्रीहोवेतिवार्तिकस्याप्यपूर्वविधायकतापत्त्यासूपर्वन्शब्दात्ङीब्रयोरापत्तिः।सिद्धांतेत्वनउपधे
त्येनलोपिनङीबनुवादेनरभावस्यतेनविधानान्नदोषः।एतेनोक्तपक्षोबाध्यसामान्यचिंतयोभयथा
प्यक्तमितिपक्षस्यापरास्तः।बहुव्रीहोवेत्यनेनसूपर्वन्शब्दङीब्रयोरापत्तेरितिदिक्।इत्यस्यानंतरमिति।
अनोबहुव्रीहेरित्युभाभ्यामनुपसर्जनादुपधालोपिनोवेतिपाठ्यमितिभावः।यथाश्रुतेऽनुपसर्जनादि
त्यस्यसंबंधोदुर्घटः।अतएवबहुराजानिपुराण्यतिक्रांतानगरीत्यत्रङीप्न।ग्रहणंचेति।येनबहुव्री
होवेत्यस्यापिसंग्रहः।पूर्वोक्तयोगविभागप्रकारस्तुगुरुभूतइतिभाष्याद्याशयः।इत्युक्तमिति।डाबुभाभ्यामन्य
तरस्यामितियोगविभागकरणपक्षेइदमुक्तमित्यर्थः।पूर्वेणेति।उक्तयोगविभागेनेत्यर्थः।अकृति
नस्यादिति।तदकारोहिपत्नीत्यादिसिद्धयेनप्रयोगसमवायीतिभावः।पल्लसाध्वसीति।एतत्सू
त्रयोगरूपज्ञापकसाध्यइत्यर्थः।एतच्चाकारस्येतिसंनिहितत्वात्साक्षाद्विधेयत्वेनप्राधान्या
च्चेतिभावः।तत्रसामर्थ्यादितिकारस्येतिशास्त्रसामर्थ्यात्कारेणव्यवधानंसह्यतेआवकारस्यो
त्तकादेशीकृतेचःपरस्मिन्नितिस्थानिवत्वेनाकारव्यवधानेपिक्लीनमव्यवधानंग्रहीतव्यमिति।

१०· अकारग्रहणेनात्वज्ञानिग्रहणं तेनैतिके त्यादावकारद्वयसत्वेपि न क्षतिरिति भावः अत एव नया सयोरिति च रितार्थं न्निनुरो इति श्रौत त्रिचतुरादीत्यर्थः आद्याकारस्येति दद्यकात्पूर्वस्येत्यंशेप्य सी
नूयमान विशेषणत्वान्नाव्यवधानं श्रात्रवत्त्रिरिति वाद्दिनो मतेबोध्यं वचनसामर्थ्यादिति श्रोताव्य
वधानमाश्रित्येत्यर्थः अनूयमानस्येति स्याक्षादनूयमाने विशेषणतया वानूयमानस्येत्यर्थः
विशेषणेषु आपील्या दिषु सिद्धिरिति अस्यैते रुक्तमिति विशेषः अनेन तत्र सूत्रे एतस्यैव ज्ञापकत्वं व
र्णयतो न्यैवं वदतस्तव पूर्वापरविरोध इति भावः यदित्वं तरंगत्वेन स्थानसंबंधत्वाभ इत्यर्थः षष्ठी
स्थाने इत्यत्र भाष्येस्य स्फुट इति स्थानेग्रहणं व्यर्थमेव तस्य परिभाषात्वाभावे न ज्ञापकासंभवा
त् इत्थं संज्ञायामिक्परिभाषानुपस्थितिस्तु भा हादीनां चेति ज्ञापकान्त द्विप्रस्येत्युद्धमिति प
र्युदासे प्राप्ते आरभ्यते अनुवादे इति च निर्मूलं यद्वा परिभाषा चूप रिभाषयोर्विधीयतरस्य ध्या १२५
हाराात्र तस्या अप्रवृत्तिरनुवादे इति च तद्विषयमेवा त एवौल्लोपो न इत्यत्र यजादिस्वादि परि

अनाशंक्य मेवेति । श्रुतेनैवान्यपसंभवे ऽश्रुतेनान्वयायोगादिति भावः

ण

इत्यस्या निर्देशेपि अव्यवधानलाभ इति ध्यक इति सूत्रभाष्यध्वनितं संगच्छत इति विभाव्यतेतदा सं नि हि
तत्वादिनैवापीत्यस्याकारविशेषणतेति बोध्यं । तद्रूपयीय इति । विधेयस्या सिद्धत्वेन तद्विशेषणा
संभवादिति भावः । लक्ष्यविसंवादमप्याह रथ्येत्यादि । तादृरूप्यलाभादिति । क्तांतात्प्रत्यया दिति
तु नार्थः क्षिपकादीनां निषेधस्यव्यर्थत्वापत्तेः । अपवादेति । येननाप्राप्ति न्यायेन बाधकविषयेतै
नैवन्यायेन बाधसिद्धेरिति भावः । प्रत्ययस्थेकेति । प्रत्ययेकीत्येवयुक्तं नयासयोरिति ज्ञापकात्कादौ
प्रत्यये इति नार्थं इति बोध्यं । एवं चाप्परस्य प्रत्ययस्थ ककारपरस्य चात इदित्यर्थः । तत्र सामर्थ्या दा
प्परत्वांशे ककार अव्यवधानं सोढव्यमिति वि भावः । विग्रह इति । दक्षिणापथ्यादिति । त्यक अन्यथा
। दिग्वाचकस्यापि ग्रहणे चेन साहचर्य त्यागे मानाभावः संगृहीतः । रूढाभावादिति । अकृतः सत्वादि
ति भावः । पावारविशेष इति । वर्णयत्याछादयतीति व्युत्पत्तेः । आगमकेइति । स्थानेपदाभावेप्यंतर
गत्वात्वागमसंबंधस्यैव लाभ इत्यपि बोध्यं । प्रतिपदोक्तस्येति स्त्रियामित्यधिकृत्य विहितस्येत्यर्थः ।
विशिष्यतदनुपादानात्कृत्यंतलाभ इति चिंत्यं । इश्वंतीति । तद्भाष्यादावदर्शनादयुक्तं । शुभ्रया विचुंतेत

कइति। नदीसंज्ञासूत्रस्थभाष्यप्रामाण्यादादंतेभ्यः क्विपोनभिधानाद्विनुक्तः। तत्र हि स्त्र्याख्यावितिपदे
आदंतलक्ष्मीविनुक्तोनतु क्विबित्याद्युः। केयदस्कुभंयातिक्विप् शुभमितिनिपातः अज्ञातादौकः के
णइति ह्रस्वइत्याह। मूलेपिध्वनितमिति। स्वशब्दस्यात्तोविशेषणमित्याहिनाभवमुदाहरणमिसं
तेनग्रंथेनेतिभावः। स्विकायामितीति। स्वाशब्दादस्वंतस्वार्थिकेकेत्वेसाधु। नहल्कस्वअत्यंतस्वार्थि
कस्याप्यपवादःआचक्षाणाइति। अकचमुक्तस्यावैकल्पिकमित्वमाचक्षाणाद्ससर्थः। स्त्रीत्वमेवना
स्तीति। स्वो ज्ञाताज्ञात्मनिस्वं त्रिष्वात्मीयेस्वोऽस्त्रियांधनइति कोशादितिभावः। संज्ञाविषयकइति
संज्ञायाअपिसंज्ञापूरण्योश्चेति पुंवत्वनिषेधेनभाषितपुंस्कत्वबोधनाद्भाषितपुंस्काच्चेतिअनेनन
सिद्धिरितिभावः। अत्यंतस्वार्थिककांतविषयंचेत्यपिबोध्यं। उपलक्षणमिति। भस्त्राशब्दसाहचर्येण
भाख्यानेनचश्रुतावुक्तौ कस्येवैषात्वशब्दस्यग्रहणमतएवैषाद्वेनस्वक्षेउदाहरणमितिभाष्येप्येषैवो
क्तं। अन्यथाएतद्व्यौचपदेदितिभावः। शुभ्राजिकेति। बहुव्रीहेरपि ततः स्वार्थिकः कइतिभावः।
।एतेनातःस्थानिकत्वाभावादत्रात्वमासिद्धिस्यपास्तं। परविशेषणत्वेत्विति। समुदायस्यभाषितपुंस्कत्वे १२

नास्तीति। स्त्रीत्वाभावादितिभावः

पितदवयवशब्दस्यानत्वेनततः परत्वात्परविशेषणेदोषःस्यादेवेतिभावः। ह्रस्वपक्षेइति। बहुज्ञ
स्त्रवड्वाआसिद्धवस्थायां कपिकस्तु कप्रत्ययलक्षणेनभाग्धव्यस्य कबंतत्वात्समाससंज्ञायांस
मासांताइतिग्रहणवत्खाल्कबंतस्यैवसमासत्वेनोपसर्जनस्त्रीप्रत्ययांतसमासरूपप्रातिपदिकाभा
वात्कोक्षियोरितिह्रस्वत्वाभावेकेणइतिह्रस्वत्वेनकपीतिनिषिद्धेआपोन्यतरस्यामितिह्रस्वेक
पःप्राग्वर्तिनःखट्वाशब्दाकारस्यापोऽभाषितपुंस्काद्विहितत्वेनतत्स्थानिकाकारस्यायंनिकल्पः।
ह्रस्वाभावेतुबहुखट्वाकेतीतिभावः। प्रांचभाकुइति। नचस्त्रियामित्यस्यगृह्यमाणविशेषणत्वा
न्नोत्रदोषः। अनुपसर्जनाधिकारेणतदंतविधौस्त्रियामित्यस्यस्त्रीप्रत्ययप्रकृतिविशेषणताया
श्चलोपनेनादोषात्। अतएवधीवानमतिक्रांताऽतिधीवरीसिध्यति। प्राधान्येनतद्विशेषण
तायाव्याप्यत्वाच्च अनुपसर्जनादितिगृह्यमाणस्यैवविशेषणं। अतएवबकौभकारेप्रसिद्धिः तदंतविधि
।अन्यथाकुंभकारेयोप्यापद्येत कुंभेनसमासेपिकेवलस्यकारस्यप्रातिपदिकत्वेनतदर्थस्यापि
स्त्रीत्वेनयोगात्ततोङीप्। कुंभेनैकार्थीभूतस्यापिविशिष्टस्यापसेनयोगेतस्यायोगस्यकुमह

अप्यापद्य

त्री॰र॰ सत्वात्तेनापि योगिकदाचित्ततो ढकि विशिष्टस्य तान्निरूपितां गत्वाभावेन कुंरंगद्वोकारस्य धनापत्तेः
२६ निष्कृष्यैकार्थीभावस्यैव प्रत्ययोत्पत्तिनिमित्तत्वेन माने । समुदायेनैकार्थीभावे चयवेनापितस्यैव
सत्वात् । ननु समुदायान्ङीप्यपि अनुपसर्जनस्त्रीप्रत्ययेतदादिनियमाभावेन कदाचित्कारीत्रगन्
दापत्तिस्तथापीति वाच्यं । अनतदधिकारसामर्थ्यादेव तदादिनियमाभावेनाधिकस्यैव कार्यं बोध्यते
५३ ननु न्यूनस्यैतिलदात्रयोविस्तरस्त्वन्यत्र बोध्यः । पुंयोगेपि स्यादिति । इष्यते तु ङीषित्यर्थः । प्रसुक
इति । अनेनैवासिद्धे लवान्यग्रहणं तु उत्सस्यापत्यं स्त्री सत्र जातिलक्षण ङीषूबाधनार्थमिति बोध्यं
अत्नहीति । नन्वेवमनुपसर्जनाधिकारस्य चारितार्थ्यंम्लोकत्तदंतविधिज्ञापकतायुपपत्तिरिति वाच्यं
लक्ष्यानुसारिण्यास्यानेन स्त्रियामित्यस्य वक्ष्यमाणविशेषणतयापि तद्वारणसंभवात् तस्माद्गु कुरूचरे
त्येवतद्बारस्यं तेन तदंतविधिं विना नोपपद्यत इति तज्ज्ञापकत्वं स्त्रियामित्यस्य प्रकृतिविशेषणत्व
लोपकत्वं चेति बोध्यं तत्करणे एतद्वारत्तिरपि अनेनैवोपसर्जनपदेनोभयोरपि ग्रहणमिति न्यायात् । १२६
अयुक्तायेमिति । ङीबित्यर्थः । ताच्छीलिकस्य खुक्ते स्तदसांग्रहणमिति णेदाडेस्यैव । अकारः प्रश्लिष्ट इ

ति । तद्वार्त्तिकप्रत्याख्यानाय्येति शेषः । अभिजिद्विदभृदित्यादिसूत्रे ऽस्त्रियामित्यनुवृत्तेस्तस्य गोत्रार्थक
त्वेपि न तत्र ङीपूसिद्धं तेपीष्टः । संघांकेतिसूत्रे एतद्भाष्यप्रामाण्यादेवानुबंधकपरिभाषया अत्रनस्या
गर्गादियञ एव ग्रहणमिति भावः । एवमिति । अकारः प्रश्लिष्ट इत्यर्थः । प्रातिपदिकसंज्ञार्थमिति । तत्क
लं च ङीबिति भावः । न च लिंगविशिष्टपरिभाषया तत्सिद्धिः । एतदर्थं कृतेतत्समानार्थं भाष्यप्रामाण्ये
नास्याः स्त्रीप्रत्ययप्रकरणे ऽनुपस्थितेः । सामर्थ्यादेवेति । अत्रातिपदिकत्वेपीति भावः । उच्चारणार्थं
इति । तेन प्रकृत आदेश सिद्धिः । नित्करणेति । असंनातविरोधिन्यायसहकृतेत्यर्थः । नास्तीति । अंत्यस्य
यस्य टायामपि प्रयोगादिति भावः । गोणइति । पुंसा ऽसंयोगरूपसाहचर्यादिति भावः । ठांतत्वाद
ति । द्वाभ्यां इंताभ्यां क्रीतादिष्विति स्यादोनिषिध्यविनार्थेत्रेहि कनो लुक् । कंबल्यमिति । अपरिमा
णत्वेल्वेतयोर्ग्रहणं नियमार्थं उन्मानस्य च द्विस्तकंबल्ययोरेवेति । तेनान्यत्रोन्मानेद्विपलीहिनिष्की
त्यादिसिद्धिः । श्रुतत्वादिति । अवांतरवाक्यार्थबोधोत्तरं येन विधिरित्यस्य प्रवृत्तेस्तत्काले श्रुतत्वा
त्तेनैव संबंधे जाते पश्चात्तदंतविधावपि पुनर्व्यापारे मानाभावइति भावः । इहापीति । इहैवेत्यर्थः । सि

१०२ द्वांतादिति। योऽद्वाद्दहस्तप्रमाणदंडार्थे कांडुन्नक्तस्कतिर्यङ्मानमिति न तस्योर्ध्वमानमिलतिभावः॥
प्रमाणे वर्तत एवेति। परिच्छेदके ए वर्तत इत्यर्थः। तत्स्वभावादिति। इतिस्वभावादित्यर्थः। द्वयसचो
लुगिति। तस्यायंभावः। आयामो दैर्घ्यं तच्च द्विविधं। तिर्यगूर्ध्वं च। नानं च तुलादावारोप्य येन मी
यते तदिदं च विनिगमनाविरहादिति। प्रमाणशब्दाभावेनेति। तिर्यङ्मानस्यैव प्रमाणत्वात्
तिर्यङ्मानस्यैवायामपदेन प्रमाणलक्षणे ग्रहणं न तूर्ध्वमानस्य ऊर्ध्वमानं किलोन्मानमित्युक्तेरिति
भावः। द्विगोर्लुगित्ययंदोपि प्रमाणे इत्यनुवर्तत एवेति तात्पर्यं। प्रमाणत्वेन प्रसिद्ध इति। तिर्यङ्मान
त्वेन प्रसिद्ध इत्यर्थः। ग्रामादीनामूर्ध्वाधरदिगवस्थितवस्तु परिच्छेदकत्वेपि तिर्यगवस्थितवस्तु
नोऽपि परिच्छेदकत्वात्तेन प्रसिद्धिरक्षता। अन्यथेति। न न प्रमाणे ज इत्यत्र समर्थानां प्रथमाद्वे
त्यतो वेत्यनुवृत्तेरुक्तप्रयोगासिद्धिः आद्यपदयोरननुवर्तने न वेत्यस्याप्यसंबंधात्। जुरूस्यादि
ति। ग्रामइत्यादावेवेति भावः। सामर्थ्यादिति। तिर्यगवस्थितवस्तुपरिच्छेदकत्वेपि सामर्थ्यात्प्र
माणपदस्य परिच्छेदकमात्रपरत्वमितिभावः। जुगप्याक्षिप्यत इति। इदमपि इत्याद्यवर्णनमात्र १२८

२५४

वस्तुतस्तु द्वौ पुरुषौ प्रमाणमस्याः इत्यर्थे तदस्य परिमाणमिति ठक् अत्रोर्ध्वमानं किंतु द्विगोर्लुक् स्यादा
रितार्थात्सदाक्षेपेन मानं तत्र हि परिमाणशब्देनोन्मानस्याननुरोधेन परिच्छेदकमात्रग्रहणमिति तत्त्वं॥
ति नादेशेनेति। अत एव योधसोन कारो लिंगाधिकारे वार्तिककृतोक्तः। एतेन लाक्षणिकत्वादस्यानोऽप्लो
पो न इति न स्यात्। कुडोध्माद्धेभ्य आचारक्विप्यात्मनेपदार्थं च। ङकार इत्यपास्तं। अत्रत्यवार्तिकभाष्यप्र
नस्य माण्येनान्यग्रहणे प्रतिपदोक्तपरिभाषाया आचारक्विबभावस्य तदंते आत्मनेपदाभावस्य चानुक्ती
नात्। तदयुक्तमिति। अंतर्वर्तीत्यत्र मतुपो प्राप्तेरिति भावः। तन्मुधेति। विभाषासर्वस्येत्यत्र यत्नसं
योग इत्यस्यासंबंधात्। अत एव वाङ्गयाः पतिरागपत्नीति तत्रोदाहृतं भाष्ये। आगपूरकत्वेन कस्या
श्चित्पतित्वमितिभावः। इन्नकेरिति। प्रत्ययत्वे हि आद्युदात्तश्चेत्येवं स्सिद्धे तद्वैयर्थ्यं स्पष्टमेवेतिभावः॥
नलोकारेणेति। ततश्च सआंतरतम्यादनुदात्त एवेतिभावः। स्वारद्वये। मनावीमनुरित्येतत्। सम
लस्येति। एतच्च गर्दलचरत्यनुसारेणोक्तं। दिङ्नाणाजिव्यादावित्याचापि ग्रहमाणविशेषणत्वमेवेत्युपमा
नामीतिसूत्रभाष्यसंमतपक्षे त्रिपुरुनीत्येणीति बोध्यं। छांदसत्वाद्वाङ्गेनद्। तद्धनयन्संज्ञा तानंगी

२५५

२० कारे आह। छांदस वाहीति। ङीपूर्णत्वं चेति शेषः। प्रां वदति। कैयटादयस्त्वस्यार्थः। छांदसेषु सत्रेषु वाग्ग्र
हण वदिदमेकदेशमपीति तेषां भावः। नमत्ययेऽति। दशापाद्यनुसारेणेदं। तत्र हि नमत्ययप्रकर
णे तत्पि शुपि रम्पि रूपेभ्याक्कि दिति इत्यप्रकरणे रूपेभ्ये तिपठितं। रूपिः सौत्र इति बोध्यं। पंचपाद्यां
तु रूपेर्वर्ण इति नकृप्रत्ययः। रूमेः प्रभ्ये तिदु ठजिल्लुक्तं। पमलइति। इदं चासिद्ध वदत्रेति भाष्ये स्पष्टं
उक्तं रूपमिति। नांतरूपमित्यर्थः। णिचिनस्तद्धितइति टिलोपे तदभावः स्पष्ट एव। नचनस्तद्धिते
ति टिलोपे नैवष्टद्यावनटे रितितुप रूपे रूपेकाजितिनि षिद्धमिति भाष्यं। अस्य मतस्य नामधा
तोदूषयिष्यमाणत्वात्तस्यनयतोक्तं मुख्यमते इति। नस्तद्धित इत्यस्यापि प्रकृतिभाव इति ष
पूर्वे तिप्रकृत्येकाजितिसूत्रभाष्ये ध्वनितत्वेन पूर्वं टिलोपाभावे पि संप्रसारणे वार्णादांगमिति प
रत्वात्पूर्वं टिलोप इति नतस्यदोषो लभ्यं तदुक्तं संप्रसारण टिलोपयोरिति। अन्यत्र हि केनांकेऽ
तुनास्ति रूपे तिदीर्घे पिए कदेशापि कृतन्यायेन गृत्वमिति संप्रसारणं भवतीति भावः। कथंचिदि १२८

ति। अनेनारूपिः सूचिता तद्धीजमेषामनभिधानमन्यथानुपसर्जनादितिसूत्रस्य तदंत विधि
ज्ञापकपेता भाष्योक्ता भज्येत किंचाचक्षाण एकस्त्री दिरूपार्थस्यापि स्वशाद्वार्थत्वेन तस्यानु
पसर्जनत्वादस्येपवङीषः प्राप्तिरभिव्यक्ते तिन्यायस्तु पदकार्यविषय एवेति भावः। इत्या
हरि ति। अत्रारूचिबीजं तु आकडास्सूत्रस्य भाष विरोधस्तत्र हि समस्तारूदंतन द्धितसर्वना
मजातिसंख्यासंज्ञा शब्दाः तिरिक्ताप्रातिपदिकमात्रस्य गुणवचनसंज्ञा कृता बहुव्रीहेश्च सं
ख्या अत्रार्थे बहुग्रहणमपि मानं सत्वे नि विज्ञातइत्यादि गुणलक्षणमपि तदेक वाक्यता प
न्नमिति। अन्यत्र प्रपंचितं व्यर्थमेवेति उत्तरार्थमिति वदतां मतेइ तिशेषः। गौणीवृत्तिरितिल
क्षणेत्यर्थः। नत्वेषा गौणी सादृश्यसंबंधमूलल क्षणायो एव गौणीत्वात्। इदंश्चेतिसूत्रइतिअ
पादानेस्त्रियामुपसंख्यानंतदंताच्चवा ङीषितितत्रोक्तंउपेत्याधीयतेऽस्याइति विग्रहः
दीर्घोच्चारणेति। निर्देशादिशाद्धे भ्य आचक्षाणणि। चिटिलोपे इंद्राणीतिसिध्यर्थं ततअदंतत्वाभावे
नतत्राप्राप्तेः पदविभज्यतेइतितत्रनकारोच्चारणसामर्थ्यात् श्रुतक्रमानुरोधेनचपूर्वं माकारस्त

नोऽनुगितिबोध्यं स्पष्टार्थं दीर्घोकार आदेशउक्तः प्रसंगादितिइन्द्रादिशब्दे इति भावः अकारोच्चारणे तिअनुक्तौतिशेषः अल्लोपोन इत्यस्य बाधेनेति अल्लोपोन इत्यत्र लक्षणप्रतिपदोक्तपरिभाषया अग्रहणे वृद्धिर्हिरूपसइतिसूत्रभाष्यसंमततया ऽकाराभावेः बन्नृपप्रासस्याल्लोपोन इत्यस्य बाधेनाकारोच्चारणस्य चारितार्थ्यादित्यर्थः नभविष्यतीति एवं च न तद्बाधार्थमकारोच्चारणमिति परस्पस्य तेन बाध इति भावः पररूपबाधनार्थमिति अल्लोपबाधनेन चरितार्थस्य पररूपबाधकत्वे मानाभावेनेंद्राद्देपररूपबाधनाय आकारोच्चारणस्यावश्यकत्वेन तदुक्तकल्पना नेवकारोति भावः इंद्राणीतासिध्यर्थमाकारोच्चारणमितिपरास्तं अदंतलाभ्यं ङीषिति इन्द्रवरुणेति सूत्रे लिंङ्ग्रीत्यादिव्याख्यार्थमुदात्तनिवृत्तिस्वरेण च स्वरेन विशेषइतिभावः सुबन्यत्रेरितिदानुत्पत्तेश्चेत्सपिबोध्यं वहुलग्रहणादिनित्यं एवगतिकारकेत्यादेरनित्यत्वेनाप्रवृत्तेरिति भावः स्करवादिभ्य इतिस्करवादयश्च स्करवादिभ्यः कन्तवेदनायामित्यत्र पठितास्करवदुःखककृादयः॥ रीतिरात्रेनिसकडारव्यातनिर्व्याणेत्यंतेद्वितीयं लक्षणं तत्राख्यातसुपदे शब्दस्त्रत्रेणेनाहएव

कस्यामित्यादि। ब्राह्मणत्वमप्येवं तत्पितृपितामहदेः कस्य हमिति बोध्यं। इयं च नान्तिप्रस्त्रणा ब्राह्मणक्षत्रियाद्याकारस्य समत्वादितिबोध्यं। बाधत इति। गोत्राणीति शेषः। प्रतीकमादायेति। औपगवत्वस्य गोत्रानंतरापत्यसाधारण्येन विशिष्यतदुक्तिरूपेक्ष्येत्यर्थः एतेन जातिलक्षणे एकोगोत्रे इति सूत्रस्थभाष्यप्रामाण्येन पारिभाषिकगोत्रस्यैव ग्रहणं भवंतीत्यादेर्गोत्रत्वारोपेण जातित्वमिति प्राचीनोक्तं मुदुष्टमित्यपास्तं। लिंगविशिष्टेतियनुलिंगबोधकप्रत्ययांतत्वरूपलिंगवैशिष्ट्यस्य प्रातिपदिकत्वस्य च लाभाय पूर्वांतत्वपरादित्वयोरीवरूपत्वेनोभयत्र आश्रयणेनादिवत्वाभावान्नात्रेयमितितन्न। इंद्राणीत्यसिध्यापत्तेः तस्मात्प्रातिपदिकत्वोपयोगेन कश्चित्प्रातिपदिकविशिष्टप्रातिपदिकस्येति परिभाषायाप्यनेतयाप्रातिपदिकत्वतद्व्याप्यधर्माणां लिंगप्रत्यय विशिष्टेतिदेशाद्वेनि दिक्नन्नुसप्तम्यधिकरणे चेति निर्देशेन विभक्त्येकादेशस्यांतवत्त्वाभावज्ञापनादुत्सर्गस्यास्तावत्रिकत्वाच्चेरत्वस्य सत्वप्रधानएवप्ररन्ते श्रीकाडइत्यादौ न दोषोन आहस्वस्तूरित्यत्रेति वचनमिति। इत्यादि पठितेमित्यर्थः उपमानाभावादिति उपमा उपमानं सादृश्यं तदभावात् तस्य समासाचाच्यत्वादित्यर्थः

मा॰

षड्लोपमात्रत्वेन प्रतीत्यभावादित्यर्थः रग्फे फेरूरित्यत्रापि तादृशप्रमूलकः रग्फत्वारोपोऽस्तु प्रती त

तिरिति भावः एवं च करभोरूशब्देऽपि आरोपविवक्षायामूङ् भवत्येव एतेन करभोरूभिरिति व्याख्यातं ए भो

केऽइति तस्य भाष्यानुक्तत्वात्साधुत्वेन नियामकत्वेऽपरूचिरत्र ङीषिति अत एव न प्राच्यः एवं तिसृ

योधेयाद्युपग्रहणं च रता र्थं तद्धितप्रत्ययाद्यौधेयादिभ्यामण्त्राविति स्वार्थिकात्रोत श्चेति प्राप्तस्तु को

निषेधार्थं न तत्कृतं वाऽञन्तत्वान्ङीन्यथास्यात् ढगं नत्वार्न्ङीप्प्रमासूदिति नित रशब्दादिति प्रघपि नृशब्दे

वनारी सिद्धा नरी च पुंयोगे ङु र्वाशान्तथापि नरत्वजाति मात्रप्रतिपादनेन्त्वायां नरीत्यस्य वारणार्थं नर

ग्रहणं बोध्यं ननु वृद्धि विधानसामर्थ्याल्लोपबाधो तत्राह गुणे त्विति अलोऽन्त्यपरिभाषाबाध एवं सा

ध्यइति भावः अंतरंगत्वेनेति सामर्थ्याद्बाधोऽस्त्वनुचितः न्यायप्राप्तबाधस्त्वनुचित एवेति भावः कथं

चिदिति संनियोगशिष्टत्वानंगीकारेणेत्यर्थः नन्वथमिति स्थानेऽन्तरतम इति सप्तम्यंतपाठस्य भा

ष्ये कुमार्यर्थ इत्यादौ यणनापत्त्या दूषितत्वादिति भावः परिभाषयो रिति तद्व्याख्यानात्ग्रंथानुसा १३

२६०

रेणेदं नेरिं अलोऽन्त्यस्यैव बाधो न त्वंतरतमपरिभाषाया इति व्याख्यातं। मानुष्यमिति। नस्योदितस्यापत्तेति। एकत्र

पंचम्यर्थे षष्ठी ताभ्यां ङीन् नुर्नरो कारस्य च वृद्धिरित्यर्थः इति भावः। अत एव मानरशब्दे नातिप्रसंगः। पतोऽनरशा

ब्दान्ङीन् तदीयसंबध्य रेफांत कारस्यैव वृद्धिविधानाद्दानरे नरस्यानर्थक्यात्ततो न ङीनिति बोध्यं तदाह

धिकमिति। अमरोक्तेरिति। तत्र स्त्रीत्वबोधे ईकारसमभिव्याहारस्तंत्रं। केवलाकारांत पुनस्तत्पुंस्त्वविशि

ष्टस्यैव बोधकः। अत एव सपुत्रदृश्यतो न संदेहः। पुमांसं पुत्रमाधेहीत्यादिषु स्त्रीन विशेषणं तत्रापि ति

तत्पुंस्त्वबोधनायेति भावः। नित्यमिति। पिंतांबामिन्तुस्वसृत्वादिशब्देभ्यः परे ङीनेन तत्पुरुषे पुत्रः तुंभरऽनेन

पुंशब्दात्परपुत्रशब्दांतत्पुरुषे पुत्रस्यादिरुदात्तः स्त्रीमर्थके न लिंगविशिष्टपरिभाषया पुत्राद्यो कारोदात्तत्वे

पुत्रशब्दे ङोतुनतत्र प्रवृत्तिः सानुबंधकत्वादित्तत्वत्रोदात्त निरत्तिस्वरेणांतोदात्तत्वमिति। भागेन्यायावोत्पु

त्रस्येत्यस्य पुत्रादि अत्रप्रवृत्तिरूनफलं। एतत्कांबं धनः परस्य पुरआदिनी शब्दपरत्वासंभवात् पुत्रः स्त्रणि

ब रूपेण दुहितृशब्दत्वे पिनषड्इति निषेधोन। तस्य ङन्तेभ्योङीबितिङीप्मात्र बाधकत्वात् टित्वसामर्थ्या

च्च। इदं च वार्तिकं तत्पुरुषे एव प्रवर्तते कर्तो सत्येति सत्रेडपसंख्यानात्। तथा च पासंभवात्पूर्वेणिरसाहचर्ये

२६१

२२ णचलत्पुरुष एव। एतेन बहुव्रीहिर्ङीवर्थमिदमित्यपास्तं। ङिन्नउपसर्जनत्वेन तत्र ङीपो ऽप्राप्तेश्चे हि दिक्। ङित्करणसा
मर्थ्यादिति। यद्वा ष्यङ्स्त्र सामान्यग्रहणाविघातार्थं ङित्करणसामर्थ्यादित्यर्थः। द्योतकत्वाच्च सोपि बोध्यः। अ
नुक्तानामिति। तेनात्मार्थे ग्रामटिकादयः साधवः। इदं भाष्येन दृश्यते। टापः प्रागिति। ङीबादिषु ङस्येत्संज्ञायां
च ङुदृश्यतेस्तत्र करणेन सेत्स्यति। टीबादय एव वा तेस्तु। तद्धितात्तला। प्रातिपदिकत्वेपि कृदन्तत्वेन। प्र
कृतिप्रत्ययविभागशून्येप एव तल्प्रवृत्तेः। पकारषकारभिन्नानुबन्धवैयर्थ्यापत्तेश्च। अतएव वासिष्ठादिलिङ्गवि
शिष्टपरिभाषया नात्र किस्त्वरः। डाप्प्रत्यये विजातीयडकारानुबन्धश्च न कार्य इत्यादि लाघवं हि डो
पसर्जनत्वाद्धित इत्येनेनैवासिद्धेः। यस्येति लोप इति। औङः श्यामिति धातौ कस्याप्युपलक्षणमिदं। ओर्गु
णेति। नचैतद्ग्रहणं ङीबादिषु तद्धितकार्याभावज्ञापनार्थं। तेन पङ्ग्वादौ नोर्गुण इति भाष्यं। कुरुरित्यादि
सिध्यर्थं स्त्रीप्रत्ययेषु तदभावज्ञापने आस्कुरायणी आदौ डोपि यस्येति लोपानापत्तेरतएवं द्राङ्नीआदौ
टिलोपेनेति दिक्। मिश्रीकरोतीति। आत्मानमिति शेषः। डिमिति। इत्यर्थकपाठस्य विकाराभावमात्रतात्पर्य
कत्वे रुध्यादीनामप्यभावापत्तेः। अतएव बहुयुवतीकरिनिर्मथितदध्यादिप्रयोगसिद्धिः। युपति ङ्ग्वादौ लिङ्गविशि
ष्टपरिभाषयैव प्रातिपदिककार्यसिद्धेस्तद्ग्राह्यस्याधिकारो लिङ्गविशिष्टपरिभाषाऽनित्यत्वज्ञापनार्थं इति दिक्। इति स्त्रीप्रत्ययाः। १३[illegible]

भर्त्रे

नीलरूपवदिति। प्रत्ययस्थादिति सूत्रस्थेनासुब्बत इति भाष्यप्रयोगेण क्वचित्लाघवानादरस्यापि सूचनात्
कर्मधारयान्मत्वर्थीयोपि क्वचिदिति ज्ञानोपन्नेतत्प्रयोगानुपपत्तिरिति बोध्यं। नामार्थयोरिति नामार्थश्च
नामार्थश्चेत्येकशेषः। अभेदसंसर्ग इति यद्यप्यभेदो न संसर्गः राहोः शिर इत्यादावौपाधिकभेदेन षष्ठ्युपपा
दनस्य भाष्ये कृतत्वात्तथापि संबंधानवच्छिन्नविशेषणविशेष्यभावसंसर्गस्य तेन शब्देनाभिधानान्न दोष
इति बोध्यं। व्युत्पत्तेरिति। नीलमुत्पलमित्यादौ तथा कृप्तत्वादिति भावः। अथ ष्यर्थ बहुव्रीहाविति अत्र षष्ठी
पदं सप्तम्या अप्युपलक्षणं वीराः पुरुषा यस्मिन्नित्यत्राप्यव्यभिचारात्। एवं च मासोदकादाविल्यर्थः। नन्व
व्यपेक्षावादेपि प्राप्तपदा दे [illegible] पचन्तीत्यादौ कृत्वा गस्य प्रत्ययार्थप्राधान्यस्य कृत्वोत्यागे न विशेषण
विशेष्यभाववैपरीत्यस्यासिद्धतया प्रकारीभूतकर्त्रादिकस्याभेदेनैवान्वयात् व्यभि चार इति वाच्यं।
नामजन्यप्रतीतिविशेष्ययोरेवान्वयः सचाभेदेनैवेति पदार्थः पदार्थेनेत्येन तत्सिद्धो नियम इति नाम
जन्यप्रतीतिविशेष्ययोस्तथान्वयनियमस्यव्यभिचार इत्याशयात्। पचतीत्यादौ तिङां द्योतकतया

परिमाणग्रहणाभावे समानाधिकरणमसमर्थपदं । पनेनासामर्थ्यं तन्नास्तं । परिमाणग्रहणेन एतदतिदे
शप्रवृत्तोपलक्ष्ये प्रानेआर ८

प्रत्ययार्थप्राधान्यत्यागेप्यत्रतत्यागेमानाभावइत्यन्ये। प्राप्तावुदकस्यकर्तृत्वंतयान्वयः क्तस्यकर्मणिल
क्षणेतिनयुक्तं अन्यपदार्थस्यदुरुपपादत्वात्। एकार्थीभावेति। एवंचैकैकैवोपस्थितिर्युत्पत्तयश्चभिन्नोप
स्थितिविषयाइतिनदोषइतिभावः। एतेनराजपुरुषइत्यादौव्यभिचारः राजपदार्थपुरुषपदार्थयोः स्वस्वामि
भावेनैवान्वयः संबंधिलक्षणायांतुनमानमित्यपास्तं। नापीतिघटश्चेत्यादौसमुच्चयस्यघटेभेदसंबं
धेनान्वयादितिभावः। द्योतकत्वेनेति घटपदेनैवविशिष्टस्योपस्थितिरितितत्रान्वयस्यैवाभावइतिभावः अ
तएवानुभूयतेइत्यादौसकर्मकत्वं। निपातातिरिक्तत्वेनविशेषणाददोषइत्यन्ये। देवतार्थकेति आमि
क्षांदेवतायुक्तांवदत्येवैषतद्धितइतिमीमांसकमतेइतिशेषः। एकार्थीभाववोनामसमासकृत्तुविशिष्टोप र
स्थित्वात्तत्रापीदृशान्वयोदुर्लभएवद्रोणोव्रीहिमानयेत्यादित्वनभिधानान्न। सर्पिः कुंडवमात्रमित्या
दौषत्वविकल्पोपिव्यवस्थितविभाषयानेतिदिक्। वस्तुतस्तिङ् समानाधिकरणेप्रथमेतिलक्षणेक त्रि
वाक्यतयापरिमाणेत्यस्यपरिमाणेवर्तमानात्प्रातिपदिकादित्येवार्थः नन्वप्रातिपदिकार्थत्वात् १३

स्त्री पुंनपुंसकानि

सिद्धिः प्रवृत्तिनिमित्ततदाश्रययद्व्ययोरेवात्रप्रातिपदिकार्थपदेनग्रहणात् द्रोणादिपदानांचद्रोणत्वा
द्येव प्रवृत्तिनिमित्तंपरिमाणत्वेनपरिमाणंतुलिंगवद्विशेष्यान्वय्येव द्रोणः परिमाणमितितु द्रोणौब्राह्म
णावित्यादिवदुपपन्नं। द्रोणत्वादिश्चेयत्ताविशेषावच्छिन्नपलादिपरिच्छिन्नधान्यादिपरिच्छेदकत्वसमा
नाधिकरणोधर्मः द्रोणः खारी आढकमित्येवतदुदाहरणंभाष्योक्तं साधु द्रोणोव्रीहिरितितु सिंहोमा
णवकइतिवल्लक्षणयासाधुः लक्षणाचशक्यतावच्छेदकारोपएव। एवंचप्रातिपदिकार्थइत्यस्यालिं
गालिंगंप्रवृत्तिनिमित्तकाश्चोदाहरणं। अन्येसर्वेलिंगाद्याधिक्यस्य परिमाणग्रहणंपरिच्छेदकमा
त्रोपलक्षणंतच्चनयनाह। एतावदेवस्वकंचमितिनियतोपस्थितिकत्वमिति। तदुक्तंप्रवृत्तिनिमित्त
तदाश्रयरूपंपरिमाणंचप्रातिपदिकांशेलिंगप्रत्ययविशिष्टांशेतुलिंगमहत्वादिकंच ततोनियतो
पस्थितिकमितितत्सर्वंतदर्थत्वेनगृह्यतेलिंगोदाहरणं तटस्तटमितिबोध्यं अकारांतप्रातिपदिका
त्कस्यापिनियमेनानुपस्थितेस्तस्यतदर्थत्वाभावात्। सानस्यादितिनचलिंगविशिष्टपरिभाषयासि

ा.र.
९३

द्धिः यथान्यासे प्रातिपदिकार्थशब्देन प्रवृत्तिनिमित्ताश्रययोरेवग्रहणे न लिंगग्रहणे न तन्मात्राधि
क्यस्यैव ग्रहणेन हिमानीत्यादौ महत्त्वस्यादिकृप्तसत्वेन तदसिद्धिरित्याशयात्। द्रोणादिशब्देभ्यः परि
माणस्यापि नियतोपस्थित्या तदपि तदर्थ एवेति तेभ्यः प्रथमासिद्धिः परिमाणग्रहणस्य मूलोक्तार्थ
कत्वे तु तथाबोधार्थं तस्यावश्यकत्वे नैतावदेव सुवचमित्युक्तेरसंगतिः स्पष्टैव। लक्षणान्वेति। इदं स्व
रूपकथनं न तु प्रकृतोपयोगि पदस्य स्वार्थ एवान्वाख्यातस्य पदांतरसमभिव्याहारे लक्षणेति सिद्धांता
त्। लक्षणांतर्भूतेति। सादृश्यसंबंधमूलकलक्षणाया एव गौणीत्वमिति भावः। प्रथमेति मीमांसकरी
त्येदं। किंच स्वार्थद्रव्यलिंगानि द्रव्याश्रीयते इत्यनेन सूत्रारंभे स्यानाश्रयणं ध्वनितं। एवं च लिंगस्या
पि स्वमोर्नपुंसकादित्यादिशास्त्रबलेन प्रातिपदिकार्थत्वात् तत्रापि सिद्धिरिति भावः। विचित्रत्वेपीति।
क्वचिल्लिंगस्यानियमेन भानं क्वचिदनियमेनेत्येवं विचित्रत्वेपि इत्यर्थः तदाह नियमांशेति। नियतोप
स्थितिक इत्यत्र नियमांशेत्यर्थः। इत्येव साम्यमिति प्रातिपदिकग्रहणस्य सूत्रोपक्रमे संख्याविध्येकवा

२६६

क्यतया व्ययेभ्यो प्राप्यातेभ्यो विधानार्थत्वं वदता तद्धितश्चासर्वविभक्तिरव्ययमित्यादिसूत्रे षु अव्यये
भ्यः प्रकारांतरेण विभक्तिं साधयता प्रातिपदिकग्रहणं प्रत्याख्यातं भाष्यकृता स्वादीनां प्रातिपदिका
देव विधानेन कस्यार्थ इत्याकांक्षायां यस्मात्स्वादिविधिस्तदर्थ इत्यस्य लाभ इति भावः। उपचारात् ज्ञे
यत्वारोपात्। इतिवदिति। अत्र यथा वाहीके गोत्वारोपस्तद्वत् वचनग्रहणप्रत्याख्यानोपायमाह एक इ ख्या
त्यादि। एतदनभिहित इति सूत्रे भाष्ये स्पष्टं। न्याय्यत्वादिति। इदं च यथान्यासेप्यावश्यकं अन्यथा ए
कादिषु वचनविपर्ययो दुर्वारः स्यादिति भावः। ज्ञापकेनेति ननु प्रातिपदिकार्थ एवेति नियमात्तदाधि
क्यः प्राप्तौ किं ज्ञापकेनेति चेन्न। यथा कर्मण्येव द्वितीयेति नियमेन कर्मत्वाभावसमानाधिकरणा
र्थांतरस्यैव व्यावृत्तिर्न तु तत्समानाधिकरणार्थांतरस्याथ एव गां दोग्धि पय इत्यादावपादानत्वादि
शक्ते बोधेपि द्वितीया भवति तथा प्रातिपदिकार्थाभावसमानाधिकरणार्थांतरस्यैव व्यावृत्तिः स्या
न्न तु तत्त्वे एव कर्मत्वादेरिति भावः। नन्व प्रातिपदिकार्थाभावसमानाधिकरणार्थांतरस्याप्रसि

र्थत्वा

२६७

ध्यानियमव्यावर्त्याप्रसिद्धिरितिनियमसामर्थ्यात्तत्समानाधिकरणार्थ्यंतरस्यापितेनव्यावृत्तिरि
तिवाच्यं। प्रातिपदिकार्थएवप्र[थ]मान्तुनिरर्थकेइतितद्व्यावृत्तेरेवफलत्वात् तत्सत्वे[तु]कर्मादियोग्या
र्थकप्रातिपदिकाच्चेत्तइहितस्वार्थेइत्यर्थान्नदोषः संख्याधिक्येतुभवत्येवद्व्येकयोरित्यादिभिरस्ये
कवाक्यत्वात्वार्तिककृतातुअर्थानियममाश्रित्यमात्रग्रहणंसंबोधनेच्चेतिसूत्रंलिंगादिग्रहणंच
प्रत्याख्यातमितिदिक्। जात्यादिरूपइतिजात्यादिनारूप्यतइतिव्युत्पत्त्याजात्यादिधर्मविशिष्टइ
त्यर्थः नन्वुच्चैरादीनामप्याधारतात्वविशिष्टाधारताशक्तिर्वाच्येतिनदप्रसिद्धिरित्यतस्त [—]न्वष्टे
नलिंगेतिईदृशात्तादृशाइति। अमुकलिंगादिरित्यर्थः। ननुसनित्याकारकप्रतीत्यभावेपिअस्ति
समानाधिकरण्यंस्यादतआह। स्त्वादीतिविरोधाच्चेति। सनित्यनेनसमानाधिकरण्येकारकत्वस्य
दुर्वारत्वादितिभावः। वाक्यशेषविरोधाच्चेतित त्सत्वेलिंगादेरपिसंभवेननहिविरोधइतिभावः। अव्या
सेश्चेति। ततःसनित्याकारकप्रतीतेरभावादितिभावः। अधिकव्यवच्छेदादिति हस्तमतादेः सत्वाल्लिंगा

भ्यामधिकस्यभानादितिभावः। अलिंगेति। अलिंगसंख्याचेतोकेवलंअनाश्रितंनिरपेक्षंलिंगा
दिनिरपेक्षंस्वार्थंजात्याद्याहतुरित्यन्वयः। असंभवीतिप्रकारतायाविशेष्यनिरूपितत्वात्। कारका
दीत्यादिनालिंगं सिद्धांतादितिओतःसूत्रेकैयटेस्फुटमेतत्। इदमेवयुक्तं। विशिष्टरूपोपादानाभा
वादस्याअत्राप्रवृत्तेद्रोणादिशब्दानांलाक्षणिकत्वेपिगौणत्वाभावाच्चेत्यपिबोध्यं। संबोधनप
दमिति। अत्रपुंजराजः आख्यातंसविशेषणंवाक्यमितिवाक्यलक्षणंतत्रास्यक्रियाविशेषणत्वा
भावेवाक्यत्वंनस्यादितिसमानवाक्येइतिप्रकृत्यविहितोनिघातोनस्यादितिभावइतिवस्तुतस्तु
एवंसतिनद्याम्पत् कूलंतत्रतिष्ठंतीत्याद्यर्थकेनद्यास्तिष्ठतिकूलेइत्यादौपष्ठ्यंतस्यक्रियायांविशे
षणत्वाभावात्तद्घटितस्यवाक्यत्वानापत्तौसमर्थसूत्रभाष्येसंमतनिघातस्यतत्रानापत्तिःत
स्मात्सविशेषणमित्यस्यसाक्षादन्यद्वारावायद्विशेषणंतत्सहितमित्यर्थोवश्यंवाच्यः एतेनप
तःपदात्परस्यपदस्यनिघातादयःक्रियंतेतयोःपरस्परान्वयनियमइत्यपास्तं। वस्तुतोव्रजानि

अपादानम् इति। प्रधानधात्वर्थाश्रय इत्यर्थः ३

इतिप्रभा २

र॰ देवदत्तेत्यादौजानीहीतिशेषस्तत्रव्रजनस्यकर्मत्वेनदेवदत्तस्योद्देश्यत्वेनान्वयान्नदोषग्रामकालेत्रलोट्
२ ते तिदिक्। आस्तोरित्यादि अनेनव्याख्यानात्क्रियाशब्द एवात्रेप्सितशब्देनत्वभिप्रेतपरोरूढ इतिसूचयति। आ
सुमिति। संबध्नुमित्यर्थः। केनेतिकरणाकांक्षाप्रदर्शनं। विशेषणीभूतेनेति। कर्तृपदार्थविशेषणीभूतेनेत्य
र्थः। उपस्थितंपरित्यज्यानुपस्थितकल्पनेमानाभावादितिभावः। लभ्यतइति एवंचेप्सितपदेनकर्तृव्यापा
रप्रयोज्यफलाश्रयउच्यते। यथातंडुलंपचतीति फलस्यापिव्यपदेशिवद्भावेनफलाश्रयत्वात्कर्मत्वंअ
तएवतत्समानाधिकरणेशोभनंपचतीत्यादौकर्मत्वसिद्धिः। वाक्यंभित्वेति। योगविभागेनेत्यर्थः। संज्ञा
विधीयतइति तदुक्तंभाष्ये किमिदंकारकइतिसंज्ञानिर्देशइति वाक्यभेदंदर्शयति। अपायेइत्यादिना नन्वे
वमप्येकसंज्ञाधिकारात्पर्यायापत्तिः नन्वक्रियाजनकानांसंज्ञिनामाक्षेपेणतेषांयोगविभागानुवृत्तिभ्यां
विनापिकारकसंज्ञाविधानेनपर्यायेसिद्धेयोगविभागेनानुवृत्त्याप्रतिवाक्यंसंज्ञाविधानंसमावेशार्थं
मितिवाच्यं आक्षेपेक्रियाजनकमात्रस्यसंज्ञापत्तौनटस्त्रुतमित्यादौस्वरवारणायकारकाहृत्तेत्यादौस्व

260

रितपाठायाश्रयणेधिकगौरवादित्यतआह। पुनःकारकेति। विभक्तेश्चापादानमित्यादिषुतदनुवृत्यातदनु
वादेनविशेषसंज्ञाविधानादित्यर्थः समावेशफलंतु यामेवासइत्यादावधिकरणत्वात्तत्रमीकारकत्वात्
कृदुत्तरपदप्रकृतिस्वरश्चेतिबोध्यं करोतीतिक्रियांजनयतीत्यर्थः तज्जनकंचप्रत्यासत्यातवेवान्वेति। कि
मानन्वयिनइतितदन्वयप्रयोजकतज्जनकत्वाभाववतइत्यर्थः ब्राह्मणस्यपुत्रमिति। अत्राकथितंचेत्यने
नपृच्छिकर्मपुत्रनिमित्तस्यकर्मत्वापत्तिः क्रियाजनकत्वंतुनतस्यपुत्रेणान्यथासिद्धेः। अकथितंचेत्येत
त्प्राप्तापाौनत्वाद्य विवक्षायांसर्वथातदप्राप्तौन्वप्रवर्ततेअतएवास्यनक्रियान्वयइत्याह नत्विति क
रोतीति। स्वजनकत्वेनैतानव्यपदेशान्करोतीत्यर्थः। तदुक्तंभाष्ये यावद्ब्रूयात्क्रियायामिति तावत्कार
केइतिक्रियायांविषयइत्यर्थः विषयत्वंचजनकत्वेनेति बोध्यं। क्रियान्वयिनामिति क्रियान्वययोग्यता
वच्छेदकक्रियाजनकत्ववतामित्यर्थः गृह्यतेइति अतएवनटस्त्रुतमित्यादौनदोषः क्रियान्वयीत्यर्थः
इतितदन्वययोग्यतावच्छेदकक्रियाजनकत्वादित्यर्थः। यथाश्रुतंतुनयुक्तंकारकाणांभावनान्वयइ

269

ल.र. तिवाक्यस्यघटत्ववतांघटत्ववत्त्वेत्येतत्तुल्यतापत्तेः अतएवभाष्येक्रियाजनकत्वमेवकारकत्वमुक्तं तज्जन
कत्वंचैषांतक्रियोपयोगिक्रियाश्रयत्वेनेतिचोक्तं। अतएवैषांक्रियान्वयः क्रियाजनकमितिज्ञातेकासा
क्रियेत्याकांक्षोदयेनक्रियायाजनकाकांक्षयाचतत्रान्वयस्यौचित्यात् अविद्यमानस्यसंप्रदानस्यापि
स्वज्ञानद्वाराक्रियाजनकत्वमित्यलं। तिङ्न्तादिभिरितिनैरेवतस्याः शक्तेरुक्तौकटादिप्रातिपदिकस्यउद्
ततछक्ताववृत्तेः कर्मणिवर्तमानात्प्रातिपदिकादित्यर्थेपितद्नापत्तिरितिभावः अनभिहितसूत्रम
पिअभिधानविषयेप्रातिपदिकस्यउद्ततछक्तौद्वस्यभावइत्यत्रैवतात्पर्यग्राहकमितिबोध्यं। साव
काशेति मात्रग्रहणेनकर्माधिक्येप्रथमायाअप्रवृत्तेरितिभावः प्रतीयमानामिति। अतएवतिङ्स
मानाधिकरणेप्रथमेतिवार्तिकन्यासः संगच्छते अनावश्यकत्वादिति तदभिमानादित्यर्थः। संख्ये त्रि
तिद्व्येकयोः कर्मणिस्वौजसित्यादेरेकवाक्यतयान्वयेकर्मणीतिसप्तम्याद्व्येकयोरितिसप्तम्यन्तत्वे १२६
त्वाद्यपेक्षत्वात्कर्मणिपदेकत्वंतत्रामित्यर्थोहिसाविभक्त्यर्थइतिपक्षः नचगुणानांचपरार्थत्वादिति

262

न्यायेनकर्मणिएकत्वेन्वामित्येवार्थउचितः संख्यायाआश्रयापेक्षायांप्रत्यासत्याकर्मादेरेवतत्वमि
तिउक्तोर्थो संगतइतिवाच्यं संख्यासंख्येययोर्नियमतः साकांक्षत्वेनेदृशेविषयेगुणयोरपिपरस्परा
न्वयांगीकारात् स्पष्टंचेदमत्रैवसूत्रेकैयटे। तदेकत्वस्येति प्रधानप्रत्ययार्थस्येत्यर्थः एवंचाप्रधानक
र्मादिविशेषणार्थमावश्यकंसूत्रंउक्तार्थानामितिन्यायश्चप्रधानार्थविषयएवेतिभावः कर्तव्यः कृदद्
ति। नन्वत्रद्वितीयातः परत्वात्सामान्यामपिप्रथमांबाधित्वापरत्वात्प्राप्तायाः षष्ठ्याः कृत्यानामितिवि
भक्तसूत्रेणनिषेधापत्तिस्तदधिकाराभावेउभयप्राप्तेः सत्वादितिवाच्यं अधिकाराभावेसर्वत्रैवोभ
यप्राप्तिविषयसत्वात्कर्मण्येवषष्ठ्यापत्तौकर्तृकर्मणोरितिसूत्रस्थकर्तृग्रहणस्योभयप्राप्ताविति
तिसूत्रस्यचवैयर्थ्यापत्त्यातन्मानेरवश्चेतिसूत्रस्यभाष्यप्रामाण्येनचोभयोः प्रयोगएवोभयप्रा
प्तिर्वाच्यतयाप्रकृतेनोभयप्राप्तिरित्याशयात् आक्रष्टव्याग्रामंशाखेत्यत्रकृत्यानामितिविभ
क्तसूत्रस्यभाष्योदाहरणेआश्रयपदकर्तृपदेध्याहृत्योभयप्राप्तिर्निरूप्याइत्यादाविति। आ
अ

263

कर्मणि घञ् अभावश्च

२· दिनाभवतोलौभैस्व: कद्दुत्येन्(त) कारकमिति। संख्याया: सर्वत्रविशेषणतयाभानादेकत्वेयत्कर्मे
त्यर्थ: वृक्षेशाखेतिवदेकत्वेइतिसप्तमीआधेयस्याधारत्वविवक्षया एवंचैकत्वविशिष्टे कर्मणीत्य
र्थइतिभाव: प्रत्याख्यातमितिन्यायेनैवसिद्धेरितिभाव:अनेनपंचकप्रातिपदिकार्थपक्षेप्या
वश्यकता सूचिता तत्र यथाप्रातिपदिकेनोक्ते कर्मत्वादौ भवति तथा तिङादिभिरुक्तेपिस्याद
तस्तद्वारणार्थमिदं। एवंसंख्यातिरिक्तं चतुष्कं प्रातिपदिकार्थ: संख्यामात्रं विभक्त्यर्थइतिप
क्षेप्यावश्यकं तत् एवंचकारकस्यविभक्त्यर्थत्वं यत्र यत्र पक्षे तत्र तत्रानावश्यकमिति सूचितं श्री तं
तेरिति तत्प्रीतिरेव च सुभफलजनिकेतिभाव: क्रियाव्याप्यत्वेनेति क्रियासंबंधित्वेनेत्यर्थ:।
तज्जन्यफलाश्रयत्वाहितत्वं एवमेवेति धात्वर्थ एवविशेष्यइत्यर्थ: इयांस्तु विशेष:। तत्र फलां
शोविशेष्य:। कर्तरि तु व्यापारांशइति अतएवसुपआत्मनइतिसूत्रेभाष्ये इष्यते पुत्र इत्यर्थे पु
त्रीयतीतिनप्रयोगोभिन्नार्थत्वादितियदाक्षिप्य फलस्य प्राधान्ये प्रतिपिपादयिषितं तदावा

क्यमेव व्यापारप्राधान्ये तु क्यजिति कैयटश्च ~~क्रियमेवजनकाकांक्षविभक्त्य~~ यद्यप्ययमर्थ: प्रती
कांतरे कैयटेनोक्तस्तथाप्यत्रापि स एवार्थ उचित: अत्रैव वेत्यन्यत्र विस्तर: ननु नव्यन्यायादिग्रंथे
प्रथमांतविशेष्यकबोधस्यैवानुभवप्रदर्शनात्तथैवयुक्तमित्यत आह क्रियाप्रधानमिति इदं च रूप
प्रसूत्रे भाष्ये। क्रियेति धात्वर्थांश इत्यस्यापि क्रियात्वेन व्यवहारो द्रष्टव्य: तस्यार्थ इति। आख्यात
शब्देनात्र नियमेन जनकाकांक्षविभक्त्युक्तमाख्यातमाख्यातेनेत्यादौ तथा प्रतीते: रूपसूत्रे कैयटे
पि आख्यातात्कालसंख्यासाधनाद्यवगमेपि तस्य क्रियाप्रधानत्वमिति। नामान्याख्यातजानीतिशा
कटायनोक्तौ आख्यातावयवधातुजानीत्यर्थ: अतएव सर्वनाम धातुजमाहेतितद्वत् नानार्थकसु
णाद्यइतिसूत्रे भाष्ये पठितं। नैकं वाक्यमिति साधुइति शेष: प्रथमांतविशेष्यकबोधे तु तस्य तत्वं
दुर्वारमितिभाव: एवंच। अस्य साधुत्वापत्ते श्च भावप्रधानमिति। भावकालकारकसंख्याश्चत्वारो
र्था आख्यातस्य तत्र भाव: प्रधानमिति न दर्थं तद्भाष्यकार आह। नामानीतिनामपदेनसुबंतमिति

श·र· चत इत्याष्येस्पष्टं तत्राव्ययातिरिक्त मित्यन्वयैनिरूपितं। नमंत्याख्यातार्थंप्रतिविशेषणीभवंतीतिनामानीतितद्व्यु
कृतालुक: संज्ञात्वेहितेनतस्यसाधुत्वान्वाख्यानं। अतएवरघुनाथादेणत्वेन। स
र्वनामानीत्यत्रनिपातनाणत्वाभावइत्यस्यत्वयमाशय:। स्वायत्तसंज्ञाकरणेशास्त्रा

326

नुगतायाएवकर्तुमौचित्येन। कृतणत्वस्यैवसंज्ञात्वेनोच्चारणं। तादृशस्यैवसाधुत्वा
र्थमू। तदुक्तंबाधकान्येवनिपातनानीति। संज्ञायांतद्धिनइत्यादितुनेष्यतएवाभि
धानलक्षणत्वात्तद्धितसमासादावयकर्तरिचकारकेइत्यत्रभाष्योक्तेरितिदिक्। पूर
णार्थत्वेनत्वसंज्ञकत्वं। कृत्रिमाकृत्रिमन्यायस्यसंज्ञाविषयत्वादितिभाव:। उक्तेति
ति। अधिकरणसप्तमी। पादपूरणमित्यादिनिर्देशेननिषेधस्यानित्यत्वंज्ञाप्यते
तेनकुंभपूरणभवइत्यादि। उच्चषष्ठ्यादित्वसिद्धमित्यन्ये। भाष्यएवेति। एवंच
स्यानित्यत्वकल्पनंभाष्यविरुद्धमिति भाव:। उक्तोदाहरणस्येति। ब्राह्मणस्यशुक्लाइत्य
स्येत्यर्थ:। गुणवाच्चितयेति। सदागुणवाच्चितमेत्यर्थ:। पूर्वग्रंथेति। पूर्वंतेनसमासप्र
तिषेधस्योक्तत्वेनपुनस्तेनतत्स्वीकारोविरुद्धइतिभाव:। भावप्रत्ययांतएवेति। भाव
प्रत्ययांत:सन्गुणमेवाहित्यन्वय:। तदभावेगुणगुणिनंवेति। घटस्यशुक्लोघटस्यशुक्ल

327

भा० २० इत्युभयविधप्रयोगदर्शनादिति भावः। गुणमेवेति। न गुणिनमित्यर्थः। कृष्णमिति। भा
वप्रत्ययांतो गुणवाचीति शब्देन। इतरमर्यादया तदर्थलाभात्क्वचित्। पुनरुक्तमिति शु
६६ क्लादिरूपेष्वनेनैव गंधादिभिर्निषेधस्य फललाभेन संदेहादिपुनरुक्तिर्व्यस्तमित्यर्थः।
निष्कृष्टं गुणमिति। गुणमेव नाह। किंतु गुणगतां जातिमाह। गुणत्वापन्नेति। तेन तत्र
निषेधप्राप्तिरिष्यते चेत्तत्र स्य भाष्यादिसंमतत्वादिति भावः। स्वयं भिन्नेनेति। तत्र हि
सशुक्लादिशब्दे युक्तं। अस्यापवाद इति। भावप्रत्ययांतस्सदा गुणवाच्यप्यत्र निषिध्यत
इति तदर्थ इति भावः। केवलस्य गुणस्येति। भावप्रत्ययांतश्चान्योऽपि गृह्यत इति भावः
तेन शौक्ल्यस्य शुक्लोरूपमित्यत्रापि निषेध इति बोध्यं। तदेकदेशस्य गुणेनेति षष्ठी
ति सूत्रे भाष्ये। तत्र गुणमात्रेति प्रतिपादकतया न गुणिनि तत्तद्व्याः तैर्गुणैः गुणबो
धकैः शब्दैरित्यर्थः। गंधत्वेनेति। गंधशब्देनेत्यादिः। गंधश्च गंधत्वेन रूपेण प्रतीयमानो

गंधः शुक्लादिशब्दाश्च शुक्लादिगुणसामानाधिकरण्येन तद्विशेषणतया प्रतीयते। किंतु स्वप्र
धानः स्वनिष्ठविशेष्यतया नैव प्रतीयत इत्यर्थः। तास्थ्यमिति। गुणसामानाधिकरण्ये
नैव गुणवाचकत्वमित्यर्थः। अदर्शनादिति। गंधं मालती कुसुममित्यप्रयोगादित्य
र्थः। न तस्येति। घटः शुक्ल इत्यादौ गुणिसमानाधिकरणगुणस्यापि तैः प्रतिपादना
दित्यर्थः। इत्येवेति। सर्वदा गुणसमानाधिकरणस्यैव गुणस्य प्रतिपादनादिति भावः
सामानाधिकरण्यमस्त्येवेति। गुणिसामानाधिकरण्येन प्रतिपादकशब्दानां गुणवा
चकत्वं तत्स्था त्वेनैवं द्वे शुक्लादिशब्दास्तेषां गुणिसामान्याधिकरण्येन प्रतिपादकशु
क्लादिशब्दवाच्यगुणवाचकत्वादिति दिक्। तादर्थ्यरूपसंबंधस्येति। अत एव गुर्वर्थं द्र
व्यस्य गुरोरिदमिति विग्रहप्रदर्शनं भाष्ये। सर्वपश्चादिति। ततः पश्चादिति भाष्यप्रयो
गे आद्यादित्वात्षष्ठ्यंतात्तसि उपपन्नेऽतद्योगे पंचमी विकल्पेनेमानाभाव इति भावः भाष्यप्र

वोनोपीति। प्रकृतसूत्रस्थभाष्यस्वरस्तोपीत्यस्याप्युपलक्षणमिदं। केयंदेति। उक्तक्रमत्राकुतिर्वी
जे। तच्चेनालिति। यद्यपि द्वैधषष्ठ्यांन स्वरभेदः तथापि कारकषष्ठ्या मस्येव समासनिषेधश्चा
विरोधादुभयोरप्रीतिभावः। सतिसमास इति। षष्ठीसमास इत्यर्थः। षष्ठ्यंतत्वेनोभयोरपि प्र
धमानिर्दिष्टत्वेनो पसर्जनत्वादितिभावः। पाठक्रमादर्थक्रमो बलीयानिति अप्रधानमुप
सर्जनमित्यन्वर्थतामाश्रित्यैतच्च षष्ठी समासेपि सुवचमित्यत्र बोध्यं। प्रवक्ष्यत इति।
पूर्वनिपातस्य वक्ष्यत इत्यर्थः। तच्चेति। तत्र्यवरूपारूपं वाक्त्विल्यर्थः। अप्रधानमुपसर्जनमि
त्यन्वर्थतामाश्रित्य षष्ठीसमासे पि सुवचमितियोजना। तत्र कौण्डिन्येति। अस्तीत्यध्याहारेण
धातुसंबंधे प्रत्ययाः इति क्तः इति न वाच्यं। सुरासुरैः पूजितोसीत्यादौ दोषात्। तेनेतीति। अन्यथा वर्त
माने क्तप्रत्ययेक्तस्य च वर्तमानइति कर्तरि षष्ठ्या दुर्वारत्वेन ज्ञातत्र्याद्योगे तृतीयांतत्वाभावः।
।नचेयमर्थानेरन्तृतीया पूर्वोत्तरत्र कर्तरि तृतीयायाएव निर्णयात्। सामान्यविषयत्वस्यैव
ति। विधेयविषयएव सम्बन्धो नानुवाद्य विषय इति सामान्यतो लाप्पत इत्याहुः। परेत्वाहुः।

330

तक्रकौण्डिन्यन्यायेन वर्तमाने क्तेन भूते क्तो बाध्यत इति षष्ठ्यप्ययोग्यं। यतस्तक्रकौण्डिन्यन्यायो येन
नाप्राप्ते इत्यनेन समानविषयः। नाप्राप्ते दधिदाने तक्रदानमारभ्यत इति तेन युक्तो दधि बाधः
प्रकृते तु नसः। अप्राप्तायामित्योपधावृद्धौ अचामादिर्वृद्धिरारभ्यते स्तो श्रुतइत्यादावतो न तक्र
कौण्डिन्यन्याये न तयातयो र्बाध इति नाईतद्युचामादेरिति सूत्रभाष्योक्तेः। अत्र वर्तमानक्तस्य भू
तक्तेना प्राप्तेनारंभाद्वर्तमानत्वभूतत्वयोर्युगपद्विवक्षाया असंभवात्। यदीदानस्याद्वर्तमानेत
द्रस्यादिति तस्यैवायमपवादो न्याय्यो न तु भूतेक्तस्येति दिक्। न्यासकार इति। मत्तादिसूत्रेक्य अनु
दोष्येवं। कारकषष्ठ्याः एवेति। कादियोगे तस्याः प्रतिपदविहितत्वादिति भावः। एतेनेति। उक्तप्रका
रद्वयेनेत्यर्थः। कथं तर्हीति। किमोत्यधिकरणमित्यर्थाभिप्रायेण प्रश्नः। यथेष्टस्यादिति। कर्त्रर्थ
तृजकाभ्यां कर्मषष्ठ्यैव समासइति निषेधस्तेनेति भावः। परिहरति तेति। कर्मोति रिक्तेनिषेधेन क
ते र्मणिषष्ठ्योरपीत्यर्थः। विधिरूपेणेति। अयमेव पक्षो युक्त इत्यन्यत्र प्रपंचितं। उपरंजनकत्वमात्रं बाध
कभावेन संभवमात्रं। नयादिशब्द इति। अनेनारुचिः सूचिता। तद्बीजं कर्मणि चेति सूत्रस्थभाष्यविरो

339

द्वा० १० र्थः। तत्र हि कर्मणि षष्ठी भवनेन तन्निषेधेऽस्यैवैयर्थ्यमापादितं। आकुरिति। अत्राकृतिवीजं ताभ्यां कारकत्व
स्यैव निषेध इति प्रत्यासत्तिलभ्यार्थस्यैव ज्ञापनमुचितं।। एतच्चि प्रभुवनरि धातु दिखेतत्। सानु
बंधकस्येति। तस्य हि तेनैव व्यावर्त्यत्वादिति भावः। मतांतरे सानुबंधकनिर्देशः। कर्त्तरीति। तत्स्पष्टा
र्थः। अन्यथा तत्साहचर्यात्कर्त्रर्थकस्यैव ग्रहणे सिद्धे कर्त्तरीति व्यर्थमेव। अत एवेति। अन्यथा न
कर्मधारयान्मत्वर्थश्चेदुत्पन्नेन वृत्तिद्वयकल्पनलाघवं मत्वर्थीयेन स्यादिति भावः। अत एवा
पृथुशब्दान्मत्वर्थीयेनेति। अत इति सूत्रे भाष्ये उक्तं। कृष्णसर्पेषु न दोषः। कर्मधारयान्मत्वर्थीये
कृते योऽर्थः प्रतीयते तस्मिन्बहुव्रीहिणा लभ्ये हि लाघवमिति नान्यथेति तात्पर्यं।। कृष्णसर्पवा
निति। अत्र हि जातिविशेषवान्प्रतीयते न तथा प्रतीतिर्बहुव्रीहौ। सर्वधनी आदि सुत्री स्वादिना
ठात्सिद्धं। अदंडी अवाग्मी स्वारो मत्वर्थीयांतेन नञ्समासः। बहुव्रीहिणा दंडनिषेधस्य सम्य
ग्बहुभावित्वनिषेधस्य चानवगमात्। अस्वत्वे लोगस्येति प्रत्यय ल ×संयोग× तद्भाष्य ह्ला
प्रयोगेण कृषिलाघवानादरोपी अन्यतः। ऊर्ध्वं घवयवैकायशब्द भवतो धर्मिमाह समुदाये इति

332

तथा चेति। इदं चैतत्पक्षे सरिणस्तत्राशयवर्णनमात्रं। पूर्ववल्लिंगमिति सूत्रस्थभाष्यानुसरण
भिधाने षष्ठीसमास एव न एवेति लभ्यते तच्चोपरिष्टात्स्फुटीभविष्यति। नाभेयेति इति अ
भ्यवधिक इत्यर्थस्तदाह। द्विष्योगलक्षणेति। ननु पूर्वशब्दस्य नाभिसापेक्षत्वात्कथं समा
सोत आह। पूर्वशब्दस्येति। प्राधान्याच्चेति। भवति च प्रधानस्य सापेक्षस्यापि वृत्तिरिति भा
वः। समुदायस्येति। छात्रसमुदायावयवः पूर्व इत्यर्थः। एकदेशिसमासं विनेति। लक्षणप्र
तिपदोक्तपरिभाषया एकदेश पूर्वस्यास्यैव तत्र ग्रहणमिति भावः। इति भाव इति। इत्यभिमा
न इत्यर्थः। यथाश्रुतसूत्राशयवर्णनाभियुक्तानां ज्ञापकत्वादिनामिति भावः। एतत्सूत्र
प्रत्याख्यानात्। भाष्यरीत्या तु तत्र लक्षणप्रतिपदोक्तपरिभाषायाः नप्रवृत्तिः। कर्मधारये
णैव सर्वप्रयोगसिद्धेः। तत्रैवार्थे च साधुत्वं यथोत्तरं मुनीनां प्रामाण्यात्। षष्ठीसमासस्त
द्विषयेनाभिधानाद्वारणीयः। यदृत एव सः ज्ञापकस्य च नोपयोगः। तदुक्तं नयत्न्व क्ष्यति ग
एवं प्रत्याख्यानमिति दिक्। निर्देशादेवेति। न च शब्दपरत्वेपि तु चाणीति वन्नपुंसकं स्यात्

333

नू॰ २० ण्यसत्वेन नतेन क्लीबग्रहणात्सिद्धिरिति वाच्यं॥ योगविभागस्यैकमर्धमिति निर्देशे तत्पुरुषो भवति स्या नं
६७। २ द्यद्यात्। भिन्नलिंगत्वमुपपादयति। एकदेशेति। निर्देशेनेति। एकदेशखंडइति निर्देशेनेत्यर्थः।
कोयेतेति। तेन खंडमात्रवाचिनस्त्रिलिंगत्वं सिद्धं॥ अतएव दंताधर्मस्या स्पातितमित्यादयः प्रयो
गा उपपद्यंते। अवयववाची पुंलिंग इति भाष्यं तूपलक्षणमिति भावः। अन्ये तु भाष्यविरोधेन
कोद्रवार्धपुंसीति प्रयोगान्वयेन। दंताधर्ममित्यादौ समासांतरत्वेनाभिप्रायं। नपुंसकत्वं दारिदार्थ
हराम्मिति वक्षष्ठीसमासः स्त्रियाम् इति प्रयोगाहर्षनाच्चेत्याहुः। ग्रामस्येति। नचोत्कर्ष्ये इति
एषमितिभावः। ननु पिप्पलीनां बहुत्वाद्बहुवचनं कुतो नेत्यत आह। पत्वादिति। विरोधेस्यादिति। अ
र्धस्य विरोधस्य कृतादित्यर्थः। नाभूदिति। अवयविन एकत्वाभावादिति भावः। खंडसमुच्चयेति
ति एकदेशेणेति भावः। एतत्सूत्रमिति। एतस्यैकदेशिसमासस्य विधायकं सूत्रमित्यर्थः। नाना
वैकवचनेनेति सूत्रत्रयमित्यर्थः। अर्धपिप्पलीत्युपलक्षणं सूत्रत्रयोदाहरणस्य। एकदेशिसमासो
नारब्धव्य इति तद्भाष्यउपक्रमात्। इष्यत्वादिति। तथा च वक्ष्ये भाष्यं। इष्यत एवापि प्पल्यर्धमिति।

नं

प्रयोगरूपेत भाष्यविरोधात् अर्धं पिप्पल्या इत्येकदेशिसमासेन मुक्ते षष्ठीसमासो न भवतीति द्वि
तीयतृतीयेति सूत्रस्य भाष्ये मेकदेशयुक्तः। द्विसमासेति। नद्वेष्टुवत्पुरुषेषु परवल्लिंगतानि
षेधक तत्पुरुषमत्याख्याने अर्धादेरपत्याख्यानतस्येति भावः। त्रिसप्तमिति। उत्तरीत्या कर्म
धारयेण सिद्धिमाश्रित्येत्यर्थः। एवं हि तत्र भाष्ये तत्पुरुषग्रहणेन कार्यमेतएकदेशिग्रहणात्सिद्ध
द्धेः एकदेशिनो ग्रिति वक्ष्यामि। तदिकदेशिग्रहणं कर्तव्यं न कर्तव्यं एकदेशिसमासो नारब्धव्ये तत्र
धमर्धं पिप्पलीति समानाधिकरणो भविष्यति। अर्धं चासौ पिप्पली चेति षष्ठीसमासोपि प्राप्नो
ति इष्यत एव षष्ठीसमासः। अनूपार्धमिति। भत्स्यादिपरं स्त्रिलिंगे स्युतुर्थ्यादिद्वन्द्वेनाभिधा
नात्समास एव नेति तत्रैकदेशिसमासेचतुर्भागिभिक्षेति कर्मधारये तु पुंस्त्वे चतुर्थभिक्षेति भव
नं इति दिक्। इत्यादीति। आदिना लोकेत्यादपूरणमिस्यादेः संग्रहः। एकदेशमिति। नचात्रापि
तस्य व्यवहितप्रामाण्यनाभ्यामन्वय हेतुः। सोत्र तत्कल्पनस्येतोधिकहेतुत्वमिति अभिमानात्

तयो तन्नमिति भावः। यस्य समासजातपदार्थे इति विग्रहवाक्ये दोषः। मासजातो इत्यत्रापि मासो जातस्येव दर्शन

प्रा॰ए॰ ६ तद्दानेति। परिच्छेद्यत्वं तद्रूपेति। तत्परिच्छिन्नजननकर्तृत्वं हि पुरुषस्य परिच्छेदकत्वं तदाह। य
स्येति। परिच्छिन्नस्येति। तावत्कालातीतजननाश्रयत्वेनेति भावः। येनान्वितं यस्य सद्रूपेति।
गुणीभूतमपि पदकर्मार्थे। तच्छेदेन परामृश्यत इत्यस्य मासजातपदस्मृतिपाद्यताप्रदर्शनेन कर्मत्वा
दिवृत्तीनां न्यूनताचता। अन्यपदार्थे प्रधानोयमिति भ्रमः कार्य इति बोध्यं। नास्य प्रवेशेननुति। तत्र
विशेष्यविशेषणभावे वैपरीत्येन कार्याभावापत्तेरिति भावः। यत्समासेनेति। जातपरिच्छेदको
मास इति वा स्वार्थो मासपरिच्छेद्यो जात इति स्वार्थ इति भावः। विग्रहेतीति। इति विग्रहयोः
प्रधानार्थसाम्यापेत्ति भावः। अपदार्थ बहुव्रीहाविति यस्य यत्तिरूपः स्यादित्यनेनान्वयः। पंच
विध इति। कर्मकरणसंप्रदानापादानाधिकरणरूपे। तत्र मासस्योद्धरूस्यायमिति विग्रहापि तत
कर्मत्वादिना बोधात्। निर्विवादत्वादिति। नदीयादीनां न्यासरूढादीनां विशेषः। किंचे
ति। षष्ठ्यं तानां तु नानौकिके प्रवेशः। विकृतः प्रयत्न इति वक्ष्यते। अनुपाद्धितकल्पनं। षष्ठ्यं
तकल्पनं। असामानाधिकरणं चेति। सर्वादीनीति सूत्रे सर्व आदिर्येषां तानीति भाष्ये विग्रहस्य द

र्शनादिति भावः। पदान्तरेति। सद्रूपेत्यर्थः। अन्यपदे यस्य यदर्थसंमतत्वेनान्वयः। मात्रैव। सद्रूपतः
रूपेण। चित्रागावो यस्येत्यादिना। अर्पिते। बोधिते। विषयतावाचार्थः। तद्घटकेत्यत्र पदार्थे। तत्पदघ
तत्पदेन तत्परामृष्टं। भावाभेदेनेति। यस्य चित्रा गावः सन्तीति। सचित्रगुपदवाच्यो भवतीति [illegible] वाक्यभे
देनेत्यर्थः। इत्यादिकात्प्रथमकर्तृत्वेन। सम्बद्धतामिति। [illegible] गवामि यथा धान्यं इति संबंधितत्वं ना
स्येव वाक्ये न प्रधानार्थसाम्यमित्यर्थः। कचित्कुणेति। अर्थानां इति विग्रहयोर्गुणप्रधानत्वस
मानमिति यत्तदाविवक्षितमिति तदर्थः। यत्तद्धितार्थे यदर्थे के आख्याने इत्यपि क्रियागुण
प्रधानभावस्यापि पर्यायो विपरीतः क्रियाप्रधानत्वादिरूपं दृष्टमित्यर्थः। तदाह विग्रहवाक्य
नीहेति। परे तु यादृशो गुणप्रधानभावोऽर्थानां लोके दृष्टः स कश्चिदविवक्षितः यत्तद्धिता
र्थे विग्रहवाक्ये तिङन्ते लोके दृष्टस्य क्रियाप्रधानस्यैव विपरीतः कर्तृप्रधानत्वं दृश्यत इति हि श्लोका गे
र्थः। तद्धितेषु पलक्षणं हाति मात्रस्य। एवं इति समानार्थकमेव तदर्थबोधकत्वेन धर्मानेवा
श्यमिति भावः। तदप्राधान्यं तच्छेदेन दर्शितं। तत्र सर्वनाम्नामुत्सर्गेत प्रधानपरामर्शित्वान
दे र्शि

तिशब्दस्यभेदान्नेनेनविधिरित्युक्तेऽन्द्भेदस्यार्थसामान्यात्तिदस्यएवभोरयं वहतीति सएवरथस्यकोटेः

श्रा०भ० तच्छब्देनदर्शितंभवतिचित्रगोसंबंधीयः सचित्रगुपदवाच्यइत्यर्थोदतएवतद्वहतीतिसूत्रेभा
ष्यं।तस्येदमित्येवसिद्धेइदंप्रत्यर्थेमित्याद्यंरथवहतिवोढेतीपुक्तं।तत्रशब्दभेदादित्युरस्यव
हतीतिक्रियाप्रधान्यंपाठितिफलप्रधानमित्यर्थः।अर्थसामान्यादित्यस्यरथस्य [redacted]
[redacted] इत्यर्थेपिदर्शकं वहतीत्यत्रापि विशेषणविशेष्यभावव्यत्यासइहन्कर्तव्ये
वार्थ इत्यर्थः।वर्तमानकालश्चाविवक्षितएव।एवमन्यत्राप्यूह्यम्।कालाः परिमाणिनेति
सूत्रेपिस्फुटमिदंसूक्ष्मदर्शिभिस्त्याहुः।हेतुकाद्धिश्चेति।ताद्धितार्थेत्तरपदेतिविहितेत्य
र्थः।वार्तिकउत्तरपदेनेतिहेतौतृतीयेतिभावः।नियमभंगोनेति।इदंचाक्षयथात्रुतेऽर्थेन
द्वारातस्याधारत्वेतदन्वयद्वारेवतस्यान्वयाच्चयइति शेषोऽशेषान्ति।क्रियान्वयेनतद्वारातद
न्वितार्थस्यापितदन्वयःप्रकारांतरेणापितद्भंगसंभवात्।तदेतभायेनेअसक्तइत्यल भाने
इत्यादौतदाशंकतायाप्रतीतिश्चेत्यन्ये।आधेयप्रधानइति।अधिशब्दस्याधिकरणस

अधिकरणशक्तिप्रधानस्येति
र्थः।असंगतेमिति।अव्ययीभावस्यनित्यत्वेनअपेक्षायास्तत्रासंभवादितिभावः।अप्य
थाअतोधिकारेर ५

तिदिक्षर्थः।ईश्वराधीनइत्यस्येश्वरस्याधिकरणचक्तिरित्यर्थः।स्पष्टंचेदंस [redacted] विधायेति
भाष्ये।अधिकरणशक्तिमात्रबोधकस्येत्यर्थः।अधिकरणप्रधानइति।मध्यगताधिक
रणत्वशक्तिप्रधानइत्यर्थः।तदाह।मध्येइत्यर्थादिति।चुनेतरिति।पुनरुक्तिमध्यभागइति
बोधः।अधिकरणत्वमात्रेति।अनुमध्यलिंगितइत्तिदिक्षिनाव्ययीभावस्वीकारेतिप्रसंगाच्चे
ति।चोहेतौ।अन्यथाऽन्यथेतिचदोषात्साध्येहत्वंतरकथनेनसदसंगतिःस्पष्टैवेति।अप्य ५३१
विनइति।तद्विरुद्धमध्यगताधारत्वपक्षेनिपिवनुगताधारत्ववाचकत्वेनतस्येतिभावः।अधिकर
णप्रधानइति।शक्तिमत्प्रधानइत्यर्थः।असंगतमिति।विशेषणसमासेनैवगतार्थंत्वात्तदा
हाध्यधिकरणेति।एवंचेतत्प्रकरणेनतथार्थकथनमनुचितमितिभावः।इहेदान्त्वेऽदुर्लभत्वादि
ति।सकृत्सुकृत्करितिभावः।राजकपार्थिवादिरिति।नचैवेयदोक्तत्वस्यत्त्पाठस्यानेदोषः।राजकप्रिय
पार्थिवइत्यादिधारणायतइत्वनस्यावश्यकत्वेनकैयटोक्तत्वप्रत्यास्यानस्यासंगतत्वादितिभावः

प्रतिपदोक्तत्वादिति। निरवकाशत्वाभावेपि प्रतिपदोक्तत्वेन ङी प्रोपस्थितिरिति कृत्वान्या व्याप्तिरिति भावः ५

१०२० तत्र धनयमन्नाह। एतच्चेति। भाष्य एवेति। तत्रहितं विषयः सस्य व्यवस्थया विधानमधीन इतिविग्रह इत्युक्तं। एतेनेति। नव रस रुचिरामिरस्य नेवावयवकरससमूहेन रुचिरामित्यर्थ इति भावः। एकापि समस्तीति। एकोन्यारण्यविषयापि समीतं येषो न्यारण्यादिखतइत्यर्थः। कृद्धसाधुत्वं तु सोत्र सावर्त्। स्पष्टेनेदमादेशाप्रत्ययोरिति सूत्रे मूले। विषयेइति। अतएवेपार्वतगलइत्यादेनद्वितोत्पत्तिः। अन्यथोक्तार्थानामप्रयोगइतिन स्यादिति भावः। प्रांगवंशामिति। भाष्ये यथमित्यर्थः। परस्परसंबंधाभावादिति। निष्कुष्य पंचगोपदमात्रयोः परस्परं विशेषणविशेषणभावपूर्वकमेवान्यपदार्थेपि संक्रमाछत्रोपानहमिय इत्यत्र समूहबोधपूर्वकमेव तदुपसंक्रमात्तदसंगतिः स्पष्टैव। वचनसामर्थ्यादिति। तत्सामर्थ्याद्भूतपूर्वसामानाधिकरण्यमाश्रित्येत्यर्थः। आधितइति। त्रयाणामेकार्थीभावे द्वयोर्व्यपेक्षायादुर्लभत्वात्। महाविभाषाहिव्यपेक्षायाएवपक्षे बोधिकेति भावः। आपकसिद्धेति। वचनसामर्थ्यात्सिद्धतत्पुरुषस्यान्यासामानाधिकरण्याभावाद्धनेोपानहस्यं नार्थमात्रत्वाभावादित्यर्थः। अन्यथाभूगेधनपरस्तांपरस्तार ५

सिद्धनित्यत्वरूपार्थस्यानुवादकत्वमात्रमितिभावः। ज्ञापकत्वादो बोधकपरः। अतएवेति। भाष्ये कृत्ततत्पुरुषपदस्य सूत्रसिद्धार्थानुवादकत्वादेवेत्यर्थः। त्रिपदेबहुव्रीहोरवादिरीपदस्य उत्तरपदपरत्वाभावात्पुंवत्वं न स्यात्। वार्तिकस्यापूर्वत्वे द्विशाम्यरूपे उत्तरपदे दृष्टयोस्तत्पुरुषे पुंवत्कर्मधारयेत्यनेन पुंवत्वं सिद्धमेवेति तदाश्रयणं व्यर्थमेव स्यादिति भावः। पूर्वेणेनिपातेनेति त्रिपदेबहुव्रीहाविति रवादस्य सर्वनामत्वात्पूर्वनिपातः स्यादिति भावः। नन्वेवं पूर्वनिपातव्याकुलेयेतदाश्रयणस्यावश्यकत्वे कथं प्रकृतार्थसाधकत्वेनास्य के पदस्योपन्यासइतिवाच्यं। नपरइत्यादि निर्देशेन पूर्वनिपातस्यानित्यत्वविज्ञापितत्वात् विरितिपुंवत्वमिवन्मुत्यं फलमपि स्यादन्यात्। कर्मधारयपूर्वपदकबहुव्रीहो बुत्तस्यविशेषणत्वेन पूर्वनिपातापत्तेः सन रुतः सूत्रार्थानुवादकत्वेतु नात्रतत्प्राप्तिः। दिक्संख्ययोरभावात्। अतएवेति भाष्यकृत्सिद्धार्थानुवादत्वादेवेत्यर्थः। अन्यथाबित्रोकिपुंव

के

त्यापत्तिरिति भावः। ननुभौ तत्पूर्विकं सामानाधिकरण्यमादायाद्धि सुबन्तपूर्वं काले केत्य
पि द्वयोरपि नित्यत्वं द्वर्गोत आह। पूर्व कालेकेति। तस्य तत्सामर्थ्यानित्यत्वाच्च
स्य पृथक्तो मानाभावइति भावः। द्विगर्थस्तु यदि सामानाधिकरण्यमात्रं नियामकं न
तु निष्कृष्यत्वयोरिवेक्षापूर्वकः। एवमेकार्थीभावमपेक्षितं नतु निष्कृष्येत्याशयेनाह। अतएव
वयेन विधिरिति सूत्रे भाष्ये प्र[illegible]स्यग्रहणे यस्मात्स विहितद्विस्य पदमगाग्यो येण
सिद्धिः प्रयोजनमुक्तं। चित्रैवं प्राची आलाप्रियायस्य प्राकृ इगलात्रिपद सादौ सामान्या
धिकरण्यनिबंधन पुंवत्वात्सिद्धिः। पुंवत्वे यथा कथंचित्सामान्याधिकरण्यम्
निमित्तं कर्मधारयेतु निष्कृष्ये त्यत्र मानाभावात्। तथा चार्थ इत्ति तद्वन्दे नि
यामिका। नतु तन्मात्र इत्तिता। अतिप्रसंगस्तत्वभिधाना द्वारणीयः। १

[illegible]: अतएव भाष्यं संपूर्णवचनमेवप्रत्याख्यातमिसुन्यतेतदामूलसम्यगेवेति वाद्यपद
प्रियइति। अत्रवास्पदः सामानाधिकरण्याभावे पित्रियज्ञाव्देनतयोः सामानाधिकरण्याद्व
हुव्रीहिर्निर्विबाधः। पूर्वतंत्रे जैमिनीये बाधलक्षणे दशमाध्याये षष्ठः पादे हो[illegible]
सत्रः। तेत्राह: कमेणरथंतरं वृहद्वैरूपवैराजशाक्वररैवतानि सामानि। एवामपने एकत्रं षो
डहस्त्यादिवाक्यं। द्वंद्वकृतेति। वृहद्रथंतरे साम नीप्रत्यर्थः। नेहद्वंद्व इति। किंतु त्रिप
द बहुव्रीहिरेवेत्यर्थः। स्वरविशेषस्यापि। त्रिपदबहुव्रीहौ पूर्वपदप्रकृतिस्वरेणाद्य हलस्वरः
उत्तरपदे परतो द्वंद्वेतु समनित्वाद्वृहत्स्वरेण वृहद्रथंतरे संतोदात्तमिति स्वरविशेषः स्वरविशे
षप्युस्यप्रवृत्तिरिति समर्थसूत्रे शेषे भाष्यस्पष्टे। तत्र वहेतुमाह। निरयति। चोहतो। सकोन्वस
मासांतमात्रकृतविशेषविषयत्वे। ननुवान्नद्वंद्वे पूर्वपक्षः एवषट्स्यपाहः सुउभयोरनुष्ठाना
पत्तिरेकस्मिन्नेकमितरदितिद्यनुष्ठानं मितद्वंद्वे घातदनिर्वाच्यं। पदहोपक्षमरनरेतर योगे
नेतद्वयपक्षस्तत्यदोषान्तु। केषुचिदहः सुपदेनेन केषुचित्तेलेन भोजनेपिमा संदत्ते लाभ्यां

२

भोजन्यपिनत्वमिति चेन्न ॥ परितुष्टेतुतेनेत्यादि स्यादस्वरण बहुह द्रुथंतरसामेत्यत्र श्रूयते नदाद्यांदस्तवात्रि
पदे बहुस्त्री हौ हुं द्वौ नेति कुत्र्यां ॥ पदार्थान्तरभावेण कार्थीभावस्तदा हि हुंदुस्यानित्यत्वतो वार्तिक
समन्तायदा नु तदनंतं भावेशे कार्थीभावस्तदा हुंहाश्रे ष्वात्रि पदे निबोध एवस्यनु ॥ स्वतेन स
वतीति ॥ नेत्रैद्रि कस्त स्य संज्ञायामिति समासो न द्विगुत्वाभावादिति भाव ॥ एवमेवेति ॥ पूर्वनिपाता
र्थत्वमेवेत्यर्थः ॥ शब्दप्रवृत्तिनिमित्तेनेति ॥ वैयाकरणत्वादीत्यर्थः ॥ पापाणके ॥ अत्रापि मत्ते
कुत्सितशब्दः कुत्स्यमानपरः आतएव पूर्वपदस्य सदेशालाक्षणिकत्वादेवनचादर्शि
नीयाया मानादेशनीयामात्यत्रापि द्वयोरेकविशेष्यकप्रतीतिजनकत्वेन सामानाधिकरण्यासंब
त्वापत्तिः ॥ शतोवृत्तेः प्राग् सामानाधिकरण्य एव नेत्यत्र हेतुः ॥ उत्तरस्यधातत्वाच्च हेतोः प्रागपि सामा
नाधिकरण्यमात्रं निबाध्यं ॥ भूतपूर्वगत्येति ॥ घनेनतुल्यः श्याम इति वाक्ये तद्धवार्थस्य सादृश्यस्य प्र
तियोगित्वेनान्वयादुपमानत्वमस्तीति भावः ॥ उपमेयपरत्वमिति ॥ तच्छ्यामादिशब्दानां स्यप्रमे
वा ॥ स्वच्छन्दपाचक इति ॥ स्वजनत्वगुणरत्याभिमानेनेदं ॥ नन्वेप्रधानमुपसर्जनमिति महासंज्ञा यात्रेन १७२

अत्रस्तत्र दृश्येयहल्लमंतस्पत्तिस्तेरेणाकं

३०४

॥ [illegible] ॥ ७

स्यप्रथमानिर्दिष्टत्वे अप्रधानेस्येव संज्ञानप्रधानस्येति ॥ बोधयितुं शक्यं न तु अप्राधान्यं कस्येत्यत्रास्या
नियमकत्वमाश्रये सा हि हृदयेति ॥ निरूढविशेषणेति ॥ विषयता विशेषप्रकारतावदित्यर्थः ॥ तदेव हि लो
केस्य विशेषणत्वेन प्रसिद्धं ॥ ननु द्रव्यगुणसमभिव्याहारे कस्य तो दृष्टाविषयतावत्त्वमतमाह ॥
रूढिश्चेति ॥ रूढिविषयत्वादृशाविषयतावत्त्वमित्यर्थः ॥ अपसीयतइति ॥ गुणादेरवेतादृशावि
षयतावत्त्वे निश्चिमतरत्यर्थः ॥ एकेनेति ॥ अनेककुशिल्पादिजीविनएककुशिल्यादिजीविनः कु
नाटस्ये हाहेरणाथ ॥ अत्र सम्हहरूपाः समूहरूपाः कृतादरेति वा ॥ गुणक्रियेति ॥ सत्याठकेः सत्यु
केदन्यादौ ॥ रूढिशब्देति ॥ न च द्वयेवत्तारोपवत्वे पुंस्त्वस्यारोपेण सामानाधिकरण्यमनुभयोपा पा
पेक्षयालक्ष्यानुसारेण परिभाषात्मा पन स्ववाचित्वात् ॥ पूर्वान्तग्रहणेति ॥ पूर्वान्तवत्याग्रहणेत्य
र्थः ॥ क्वचित्तथैवपाठः ॥ पूर्वनिपातविशेषप्रतिपादनवचनेनत्वादुर्भिक्षशब्दस्यपूर्वनिपातनस्ति
भावः ॥ उपमानेशब्देनेति ॥ लक्षणप्रतिपदोक्तपरिभाषयेति भावः ॥ इदं च भवेकेप्येतस्यां ॥ क्रिया
रूपस्येति ॥ क्रियापदवाच्यरूपत्वात्यर्थः ॥ भिन्नवाचीनि ॥ पूर्वपदार्थप्रधानेऽव्ययम् ॥ नित्येति

३०५

तेनतत्प्रयोविग्रहात॥उत्तरपदार्थेति॥स्पष्टं चेदं भाष्ये॥आरोपितत्वेन आद्योत्येतरेति॥आ
रोपितब्राह्मणत्वं ब्राह्मणपदप्रवृत्तिनिमित्तमित्यर्थः ब्राह्मणपदस्यत्रनआद्योत्यतरस्यार्थः एवम
न्यत्रापिबोध्यं॥एतदेवभाष्यसंमतं॥नञोवाचकत्वे आह॥आरोपमात्रे वेति॥इदन…वाच्य
मेवोत्तरपदार्थे विशेषणत्वेनदाह॥विषयत्वं तु संसर्ग इति॥तादात्म्यारोपश्चात्रा…नामार्थयो
र भेदान्वयव्युत्पत्तिस्तुनिपा…तातिरिक्तविषयेतिभावः यत्तुत्रापिपक्षेद्योतकत्वेनञ इ
तितन्न॥समभिव्याहृतपदशक्त्याद्युद्बोधकत्वस्यद्योतकत्वे विशिष्टस्येवतच्छक्तिविषयत
याद्यर्थमुपस्थितस्य भावे…न विषयत्वं तु संसर्गस्यस्या संगतेः पृथगुपस्थितयोर्हि संसर्गोऽभ
पतीत्याह॥आरोपितो ब्राह्मणत्वेति॥अत एव संबोधाकारः आदौ तु आरोपितब्राह्मणत्व
वानितिप्रदर्शनीयं॥अत्रायुष्मेवयुक्तंनत्वेत्यं॥तस्यन अर्थत्वेपि ब्राह्मणादिपदानां मुख्यार्थ
बंधानब्राह्मणत्वादिमपि…शक्तिग्रहात्तत्रारोपितत्वान्वयस्य दुर्घटत्वात॥नचनञसमभि
व्याहारात्तदर्थत्यागः शब्दार्थसंबंधस्यानित्यतापत्तेः मन्मतु नदोषः प्रसत्वसंबंधेनब्रा १७३

ह्मणत्वपमतरवारोपितसंबंधेन ब्राह्मणत्वबमोपितद्दर्थत्वात॥नञ्सत्वविशिष्टस्यतदर्थकत्वमा
सर्थनिर्णायकः इदमेवनञोद्योतकत्वेनाम॥एतावतैवात्रेकार्थीभावव्यवहारोपि॥विशिष्णानुरूपशक्तिध्यो
त्यार्थसंभाविताशक्तता वच्छेदकत्वाद्विशिष्ट…स्यार्थवत्वं॥समासविधायकेणस्त्रबलादत्रे रमिवकल्पना
चिता॥प्रतायर्थितस्यादोतुनेवमप्रादिव्यवस्थार्थमन्यथातत्रकल्पनात॥लोकस्यतुनत्रापि विशिष्टशक्त्यैवा
पः॥अवयुपशक्तिबोधनद्वाराविशिष्टस्यविशिष्टशक्तिबोधकत्वसवचव्याकेलमितिदिक॥पर्यवस्यति ति॥
भेदस्यवारोपस्यसंभवा……दितिभावः॥अत एव॥उत्तरपदार्थप्रधानत्वादेव॥इहेतिनामितिप॥
अन्ययोरुपसर्जनत्वादपनोरूढिक्त्र्यादिलोपस्यसूर्यांरहेतनतद्दयर्थ्यं स्पष्टमेव॥नन्वेवंतनसामर्थ्या
दुपसर्जनत्वपित्वमितिवाच्यं॥लाघवेनानेरपुदार्थप्राधान्यस्यैवतापपितेमुक्तत्वात॥अश्रीव्रमणा
नेरवपोर्विशेषश्चैत्यः अर्थिकार्थमिति॥आरोपितत्वबोधानतरंश्रेकरणादितात्पर्येणाहकवशात
मानसत्वदर्थबोधदतिभावः उत्तरपदप्राधान्ये तदर्थप्राधान्यं भाष्योक्तमित्यनेनकयदाद्युपपा
दित पूर्वपदार्थप्राधान्यपक्षस्यतदेतम…स्यातुचात्वे बोधितत्वान्यत्रप्रपंचितं॥धालतवदेतेलि
नन्वेवत्वादेतीदृशेविषयेआरोपितस्यान्तरत्वमोनरसंख्यायाश्चपूर्वसंख्याबाहाप्रतिबंधकत्वो

द्वा०८० ४ नतत्र बहुत्वभागं तंशब्देनैकत्वस्यैवोपस्थिते श्च अन्यथानेकमन्यपदार्थ इत्युक्तावपि वास्तवबहुत्वमलाभ इदं वचनापत्तिरित्यरुचेरगदं पदेन निरर्थगमजह स्वरूपलक्षणे सापकसमूहस्यो पि अनेकैकेनेत्यस्य पद्यभेदेनो भयविशेषणत्वात् सादृश्यादयः इति तदंत इत्यर्थः कारिकायां सह दृग्गानीति पाठदर्शनात् तन्त्वकीयेति तद्वयेपि इर्वंति घामार्थिकार्थकत्वकथनात् आकारविरुद्धं चेति विशिष्टेन लक्षितस्य प्राधान्येपि अका रकोत्तरपदार्थप्राधान्यहानेरिति भावः मासजातवदिति नचयपथाजतस्य प्राधान्यं तथा सकलेन ब्राह्मणा देशरोपितो ब्राह्मण इति बोधात् तजर्थमिलितं न तर्थमकारेणजनितबोधात् ततः समस्तपदे आट्ये सा स देशादिलक्षकमित्यर्थ इति तत्ज्ञानारइति ॥ भाष्यविरुद्धमिति तथा मकारस्य भाष्ये उक्ते अ एवं तद्दो धसंभवेन लक्षणायाम्यर्थत्वाच्च असमर्थ पितुमिति मीमांसकाद्युक्त पूर्वपदार्थ प्राधान्यमिति शेषः ॥ लक्षणो वेति नञो भेद वसदार्थ इत्यर्थः इदंतु उपलक्षणं निपातानामनेकार्थत्वादित्यपि ज्ञा पकादिति नञ्समासे उत्तरपदार्थप्राधान्ये सत्यपि द्व वनितत् पूर्वपदार्थप्राधान्येपि इति सामान्यापेक्ष त

म

३४८

ज्ञापकादनेकमि स्यादावेकवचनस्यापि सिद्धिरिति भावः एवमाश्रयणे तु गौरवं लाघवात् उत्तरपदा र्थप्राधान्यज्ञापकत्वमेवोचितं ॥ तदेव ध्वनयन्नोक्तं ॥ कथंचिदिति ॥ यत्तु इदंतु समर्थ ६ नोविचारचितामणिप्रकाशकारा इत्याहुः ॥ तन्न नत्र उत्तरपदस्य न दर्थे लाक्षणिकत्वे तद्वि शेष्यकबोधे चोपसर्जनत्वासंभवेन अन्यादि सिद्धये ज्ञापकोपन्यासवैफल्यापत्तेः लाक्षणिकतात्पर्य त्वेऽप्युपसर्जनत्वभ्रमाद्विशिष्टस्य लाक्षणिकत्वे मैवं णत्वं तूत्तरपदप्राधान्यमिति तदुक्तविशेषादि सूचनं न्विद भाष्ये नोक्तमाह उपेयेति ॥ इत्यस्यार्थः एवंसमर्थनेप्यत्रासाधुत्वमेव मुनित्रयसम्मते र्थे एवं शब्दानां साधुत्वस्य सर्वं संमतत्वादिति बोध्यं ॥ वदन्तीति ॥ विचारचिंतामणिकृदिति भावः पतंति ॥ पतो वृधात् इतं नेनोपावनयति सत्वयः संबोधनीतं संबोधनपदे क्रियायाविशेषणत्वं पञ्च तत्त्वमिति हेतुं यत्त प्रमाणं ॥ कृत्वोर्थाः क्रियाभ्यावृत्तिगणनेन द्विधा ॥ प्रथमावति ॥ तेन तुल्यं क्रिया चेदिति विहितः ॥ असंत्वनमु ॥ प्रसज्यप्रतिषेधार्थकः इति शेषः ॥ तेन एवप्रसज्यप्रतिषेधसमर्थस मासे इति तत्र तत्र भाष्यकृता ॥ तत्र असमस्तनञः क्रियान्वयित्वं ॥ वचनं पुरुषस्य वस्यति ॥ घटाभावोम

त्रै ऐ

३४९

२१०॥ द्भावइत्यर्थः एकवचनमध्यमपुरुषप्रयोगे वापत्तिरिति भावः अन्यथा पुद्भावपक्षे वचनपुरुषमध्यपुरुषादिरूपमापि
दूषणमित्यर्थः॥ कारकविशिष्टक्रियेति॥ भूतले घटो नास्तीत्यादौ भूतलाधिकरणकघटकर्तृकसत्ताभा
वइतिभावः॥ पूर्वप्रथमाद्येइति॥ असंहितमित्यस्य संहिताभावइत्यर्थात्॥ असंदेहाइत्यत्रारोपितसंदेहो निश्च
यइत्यर्थइत्यभिमानइतिबोधनद्भावप्रतीतिरिति गुणभेदेन धर्मिण आरोपात्॥ एवमनुपलब्धिपदेऽपिबो
ध्यं॥ न्यायसिद्धे एवलिंगदर्शनमूलोक्तमिति तत्त्व॥ इत्यवेति॥ अत्र नेगानन्त्राद्दे नेवैकयदस्य समास ख्लानो
धा॥ प्रकारेनेकसंख्यत्वप्रतीतेः॥ एकप्रकारेणेत्यर्थान्यथानुभवाच्च॥ एवमेव नेकरूपोऽहमित्यानुरिति
विष्णुसहस्रनामपद्येनेकरूपइत्यर्थ नेकशब्देन रूपत्रयस्य बहुश्रीहिर्बोध्यः॥ गतिसंज्ञा विकल्पइति॥
तत्फलं समासविकल्पः॥ कथमिति॥ गतिरिति ते प्राग्धातोरिति धातोः प्रागेव प्रयोगः स्यादिति भावः॥
प्रयोगनियमेति॥ गत्युपसर्गसंज्ञाधातोः प्रागेव प्रयोक्तव्याइतितदर्थः॥ संज्ञानियमेति॥ धातोः प्रा
क्प्रयुक्तानामेव ~~प्रागेवप्रयोगः स्यादितिभावः॥ प्रयोगनियमेति॥ गत्युपसर्गसंज्ञाधातोः प्रागेवप्र~~
~~योक्तव्याइतितदर्थः॥ संज्ञा~~॥ गत्यादिसंज्ञाभाग्येषामितितदर्थः॥ अयमेवपक्षोयुक्तोलाघवाद्

न्यतरस्यामनित्यसमासे॥ अनित्यसमा

निरुक्तं भाष्ये॥ प्रयोगोपाधिरिति॥ त्वप्रत्ययप्रयोगप्रयोज्यं पश्वात्मानसंबोधविषयमित्यर्थः॥ श्रद्धा॥
अभिलाषातिशयः॥ एतेनेति॥ पुरइति कौतुकेत्यनेनान्वेति॥ नस्यन्वनक्रियापास्यकृत्व॥ नस्येनस्यस
मीपइतिशेषइतिभावः॥ संज्ञानियमपक्षे तु शकैवनेतिभावः॥ माधवइति विभाषेति सूत्रेतथोवि
ह्यस्य निरस्यापितास्तिद्विरित्यन्यो इहेति॥ तेन निर्वन्वने रुत्वेति सिद्धं॥ गतार्थइत्यतिमिति प्रश
स्ताइतिभावः॥ नित्यसमासतामिति॥ तिमांतोदात्तात्वनुत्तरपदादौ नित्यसमासेयन्न पदसा
येकोऽजंतोदात्तं ततःपरा तृतीयादिविभक्तिरुदात्तेत्यर्थकेन नविभक्त्युदात्तत्व एतेन शाकपा
र्थिवादित्वादिष्टं सिद्धमित्यपास्तमितिभावः॥ श्रेणेप्यत इति॥ अतिङः ग्रहणकैणेन तत्यस्यत्वे
एत्व बोध्यतइतिअर्थः॥ उक्तार्थे साधकमिति सत्युत्वक्तेः पूर्वं समासो बहुलग्रहणादिति
भावः॥ कुत्स्यन्तेरित्यपलक्षणं॥ स्त्रीप्रत्ययोत्यन्तेः प्राणेत्यपिद्रष्टव्यं॥ अनुवर्ततइति॥
उपदेशकृतया अन्त्ययसंभवाद्विधाभावाच्चेतिभावः॥ उपपदमितिमहासंज्ञया कर्व

०तृ०५० ७४ नस्यैवोपपदत्वात्॥ अत एवेति॥ क्त्वातुमुनोरित्यनेन तेनैव तेन समासः स्यादित्यर्थः॥ व्याङोरिति व्याङो मध्ये
विशब्दस्य प्रशब्देन तदन्तेन प्रशब्देन गतिसमास इत्यर्थः॥ अङ् सुप्युपपदसमास एव॥ अतिङ्वी
पसर्ग इति॥ सप्तमीनिर्देशात्॥ उपसर्गत्वं पर्यायस्याधिकरणस्यैकस्यैवोपपदत्वादिति कश्चिन्नु
न्न॥ गतिसमासेन सिद्धत्वात्तत्रोपपदसंज्ञाया एव फलाभावेनाभावात्॥ अत एव कर्मण्यणि
ति सूत्रे नुपपदत्वेनायं व्यवहृतो भाष्ये॥ व्याङोश्च कर्मणि प्रमादेनेत्यादन्तेन चगतिसमास इ
त्यभिप्रायः॥ कर्त्रेति॥ अधिकरणस्य करणत्वविवक्षया तृतीया॥ न च कारकत्वात्सिद्धं
॥ कारकत्वेप्युपपदत्वाहान्यापरत्वादुपपदसमासस्यैव प्रवृत्तेः॥ उपपदमिति महासंज्ञा
माश्रित्य प्रथमां तस्य निरुक्तिरुच्यते॥ उतत्त्वनाश्रित्य॥ नापूः तदाश्रयणेऽत्र तन्निवृत्त्या
त्रेमंडूकानुवृत्त्याश्रयणे गौरवात्॥ नोत्य इत्याह॥ तथा सतीत्यादि॥ प्राप्तिलेति गुतिरिति स
त्रेपि तदसंबंधेयं दोषः॥ एवं निर्गत इति॥ संपन्ने ति च॥ प्रमुकमिति॥ भुवि॥ त्यत संबंधे येप्त न द्या

दनावतिङ्पदस्य वैयर्थ्यापत्तेरित्यभिमानः॥ त्रोपीरुतेनेतिभाष्यकृतेनेति दोषः॥ कथमिति॥
संहितायानित्यत्वादिति भावः॥ दिग्मात्रं॥ दिगर्थस्तु यदि क्त्वा विस्त्यनुत्य सैवर धानाहारकोत्र
अतीत्यस्य व्यावृत्तिसिद्धावतिङ् ग्रहणमेवाभयो निवृत्तोज्ञापकं॥ महासंज्ञाकरणाश्चरा
उदशीत्यादौ न दोषः॥ क्त्वा प्रजातादिति॥ णिनेः क्त्वा तुमुन्नति विभासंभवेन तं विनोपपदत्वाभावे
नाहापाश्च॥ निर्गत इत्यादौ तु शब्दान्तरसंबंधात्पूर्वं क्त्वा तुमुत्तो लुक्पदत्वोत्तरपदांतरसं
बंधेन नक्षतिः॥ माङि लुङि त्यादौ तु सति सप्तमीति नोपपदत्वं फलाभावाच्च प्रथमार्थस्य सो
त्री सप्तम्य व्यवहितत्वभिन्नं॥ अत एव पशावित्यादौ मां नोपपदत्वं॥ एधानाहारक इत्यादौ नु
क्रियार्थोपपदस्येति कार्यार्थमुपपदसंज्ञावश्यकत्वेन तत्रोस्य प्रवृत्तिर्व्यावृत्त्यर्थे तन्म
रितार्थध्वनितं चेदं भाष्य इत्युच्यते॥ तदा लुङुभयोर्न विरोधः॥ अतिङ् श्चेत्तस्यातिङ् त
नो धातिन इत्यर्थः॥ एवं चोपपदमातिङिति व्याख्यानस्यानयकृत्यमर्थयोरिति सूत्र

१०२० स्यभाष्यविरोधोहूषपगमिति नियमस्यभावेनित्र्भेनेति नियमस्यभावलब्धेत्यर्थः। अभेन
ये तुल्यविधानं यदुपेप्स्तंतद्वर्णेन समस्यते। अन्यन तुल्यविधानं नेति यचनव्यक्तेरितिभा
वः। नतुस्सस्य इति नतुस्त्रस्य एवाहत्या द्विधायोज्यतइति भविमितव्यमितिभावः॥
तद्वेति। उपपदमित्यर्थः। अमेभोजमिति। अत्रविभाषाग्रेमथमेति कत्वापिविधा
नोन्नास्यामेव तुल्यविधानता। अमेभुक्तत्वासायमेतेन समासाभावान्नतस्यनिय
मविषयतेतिभावः। उत्तरपदप्रकृतिस्वरइति। उत्तरपदाद्युदात्तत्वमित्यर्थस्त
दाह आदिर्णमुलीति। अभ्यस्तानामिति न नानुवर्ततइति मतइदं। यद्यपि लिल्य
रणमुल्स्वरयोरत्र विशेषः। आदिर्णमुलीतित्यनेकाजर्थंत थाप्यभ्यस्तानामित्य
नुवृत्त्यभावपक्षे प्रत्ययादिस्वयाप्यमित्यभिमानः। क्लिचीत्यनेनापिइदं कसाधो।
अनोघ्रातमिति। फिट्स्वरेणेति भावः। महाह्रस्वादिषिचेति त्रेस्वरेणपाठप्रसिद्ध

तिभावः। समासोनापेक्ष्यतेति पुरुषस्य समासस्यानिवायवस्त्यर्थः। समासोनाइत्तिसूत्रे समासे तिलु
सप्रक्ष्छेकंबाध्यं॥ द्वयसचइति ऊर्ध्वमानत्वइदं प्रमाणलेति मात्रचोलुगिति बोध्यं। नन्वयं प्रक
रणविरोधोनआह॥ हेमंतेतिचाहतोयतोद्वंद्वेत्यनेन मतोगोणयोगइत्यर्थः॥ स्पष्टंचद्वंद्वार्थं
२ त्वभावदस्तेनातं एकवद्भावादिति समाहारद्वंद्वत्वादित्यर्थः। औकारेति पुल्लिंगस्येनतोदाहर
णादित्यर्थः। एतान्हा इतिपुंस्त्व प्राप्तआह॥ संख्यापूर्वमिति। स्पष्टार्थइति विपरीतनियमस्यस
हंवारणार्थसमूध्वनेयनकेवीनन्दारणमाह। अन्हएवेति। हिंगादिति। अन्हएवेति नियमतदु
मर्थ्यं स्पष्टमेव॥ नियमफलं त्वाह्निकमिति। अन्हानिर्वृत्तमित्यर्थे कालादित्यनतक्तेनेनानि
र्वृत्तमिति अत्र असंभवादिति। यद्यपि द्वासणान्हइदमुवयवभूतमहरित्यर्थे पष्ठीसमासः
संभवति। तथाप्यत्र सूत्रे हः सर्वैकदेशसंख्यातपुण्याच्चेत्यस्यानुवृत्त्या सिद्धे एतेष्वद्वस्ततया
व्यवहितानामहः शब्दे भिन्नानामग्रहणमित्यादि प्रामाण्यादितिबोध्य। तस्यानिमिधानोऽत्र
प्रकरणेति। तद्धन्नस्यसमम्याविपरिणाम इतिभावः। सामर्थ्यादिति। अहन्शब्दोनतत्पुरु

६ पादृचएव विधानादिति भावः॥ कथंचिदिति। शब्दतो नुपस्थित्यावाक्यार्थान्वयित्वासंभवइति
भावः। यत्तन्हादेशउधस्तोनडुत्समासांतएवएवं च विभक्तिविपरिणामोनकार्यइति तन्न। एट
जपवादत्वापत्तावत्यन्हइत्यादोऽअनोदात्तत्वानापत्तेः। टचेतु तत्सामर्थ्यादन्तोदात्तत्वंतत्रेष्टमि
तितद्ध्वनयन्नाह भाष्येति चेति। अत्रप्राचइतिभदंतस्येति पकेय्यनित्यस्य प्रकृतसूत्रस्थवा
र्तिकस्य प्रत्याख्यानायभाष्यकृतइत्यर्थः। दीर्घो हीतिबव्हादिष्वंहेति पाठान्पेसत्तेनोऽपि
डीपू। अयुकमिति। कालाढञः तेदपवादत्वादिति भावः। प्राग्वादिकृत्वादितितदपवादस्यठ
ञः प्राप्तिरिति भावः॥ लुकेति। स्वरूपकथनमेतत्॥ अध्यौकारइति। एवं च वर्णमेधान्यत्वेन
प्रत्ययलक्षणमिति भावः॥ लोलुकीति। निष्कादिभ्यः समासेठक्प्राप्तिरिति भावः॥ नि
ष्कस्यपरिमाणत्वेऽपि संख्या भूषणादिवाचित्वे असमासे इति सूत्रेपरिमाणवाचिनिष्का
दीनामेवग्रहणेतु ठकोलुकीति बोध्यं॥ नचद्विनिष्केत्यत्रनिष्कस्यपरिमाण
त्वे द्विनिष्कीतिङीपेवं भाव्यं। उन्मानत्वे पि त्वेद्विनिष्कीतिङीपेवभाव्यं

क

उन्मानस्य चेद्विस्तकंबल्यपरे संनिषेधइति नियमेन ङीबेवप्राप्नोति। एवं च द्विविस्तेत्वत्रवि
स्तादिप्रतिषेधेन ङीबभावोनतुठञोऽपरकारादिति भाष्यं। निष्कशब्दउन्मानवाची। बिस्ताद
यः परिमाणविशेषाएवेतिमतम्। तस्य परिहरस्तादिभिरकारान्तेयोर्व्याप्यात्। तथाहि अप
रिमाणांतत्वाद्विष्वेधिति ङीपि निषिद्धेपि ठञंतत्वात्प्राप्तस्योकारलोपेनवारणात्। एतेनाद्विविस्ते
त्यपि व्याख्यातं। नचैवमपरिमाणेतिनिषेधोव्यर्थः स्यात्सामर्थ्ये नतद्भावकल्पनापेक्षया न्याय
सिद्धोक्तरीत्यैवतद्वारणस्योचितत्वात्। तेनापितदर्थबोधनस्यैवौचित्यात्। तदंतस्येति। तदंतार्थस्ये
व त्यर्थः। उदाहृतमिति। अनुपसर्जनादितिसत्ते वार्तिके कारणइति दोषः। चतुर्थ्येः। द्विगोरितिङीविधे
र्बाधः। तेषु यवस्तादिगणे भस्त्राशब्दस्याभावात्। नसमाहारेचेति। अस्यस्त्रीत्वभंगीकुर्वतांमतेइति पा
शेषः। अतएवनमाहारोपपूर्वकमुपपादयति। स्यादेतद्विसादिना। स्त्रीत्वसंभवेति। तत्रान्तरहार
त्वस्यपरत्रान्तरंगादितनमासमाचारार्थेनिमित्तलिंगस्यांतरंगस्यसार्वत्रिकस्य न बाधेनोपपत्तेश्च ए

१०र र्भूतत द्धितार्थनिमित्तलिंगबाधकत्वे मानाभाव इति भावः । पुण्याहमित्यत्रोक्तमेव ज्ञाप्यं चैकस्माद्दे
२ शनिषेधात् पुण्यसुदिनाभ्यामह्नः क्लीबत्वस्य सत्वाच्च साधयितुमाह । चतुर्णामिति । परवल्लिंगादिति ।
अह्नाहोंतात् एषपक्षे स्यात्तद्धितार्थे द्विगुरित्यस्य परत्वादिति भावस्तदाह तथा चेति । केचनाया
त्रकृतो सर्वाण्ह इत्यादौ । अलंकृतेनेति । अनिनस्त्रीत्वमेव ज्ञापितमिति सूचितं । तथाहि नाज्ञाह्ना
हादसेनेन बहिर्भूततद्धितार्थनिमित्तलिंगबाधकत्वेनेउपस्थितरात्रात्राह्नाहरात्राद्भ्योर्थविशेष्य
त्वप्रयुक्तपारिकलिंगस्येव बाधः स्यान्नतु बहिर्भूतसमाहारविशेष्यत्वप्रयुक्तस्यापि स्त्रस्या
पि । अतोन्तरंगन्यायाप्रातिः । किंवपाय लक्ष्ममित्यादिना कृस्याणिकोक्षेपरत्वाच्चिनाप्यह्ना
हादिविषये पुंस्त्वबाधापत्तोपरवल्लिंगेति सूत्रे एकदेशिग्रहणं कृत्वाभाष्ये कृतान्कृतस्या द्वि
गुप्राप्तेति वार्तिकप्रत्याख्यानस्यासंगतिः । तत्रचात्रेत्यादिबाधार्थं तस्यावश्यकत्वात् ॥
नचेदमप्यकृदेशिसमासविषयकमेव । अत एवाहरित्यत्र पुण्यसुदिनाभ्यामित्यादेवैयर्थ्याप

त्तेश्च । अतिरात्रः सर्वाह्न इत्याद्यसिध्यापत्तेश्च तेनाद्यादेस्तद्धितार्थे द्विगुरिति क्षेत्राञ्चता प्रातिरिक्त
विषय एवत्याय्यमिति दिक् । एवंचोत्सर्गस्य परवल्लिंगस्य द्विगु इत्यादिनिषेधे तद्विषये तदपवाद
स्याप्यप्रवृत्तिरिति निरस्तं । अहरिति क्रांतारात्रिरित्यर्थे समासस्य स्त्रीलिंगत्वात्तत्र टजभावे दीर्घा
यामेव विरोधसत्वेन नाक्लिटजोर्विरोध इति कृपयासंगतिश्च । तस्मात्प्राधान्यं प्राप्ते स्यादिस्तद्धिता
र्थे द्विगुरिति क्षेत्राह्नाहांताद्यतिरिक्तविषय एवत्याय्यमिति दिक् । द्व्यहनीयस्या मिति । बड्
श्रीहोरात्राह्नाहा इत्यस्यात्रासेरिति भावः । बहुकादिरिह ह्नाद्यपाठादुपसर्जनेत्वपि न इति । तदन्तस्या
पीति । तेन परमधाहः सिद्धः । अपाणिनीयत्वादिति । घासादिषु महत आत्वं इत्येतस्य पाठोस्तीति कृतो
रिति भावः । आन्महत इत्यत्र लिंगविशिष्टपरिभाषाभावस्य ज्ञापनार्थे तिपादिकादिति सूत्रे भाष्ये
कृत्वेन पुनः पालपरत्वादाह मितिनद्यांख । अतिरभसादिति । आहीयप्रत्ययस्यैव तेन सुकोपि धा
नादिति भावः । द्वंद्वे नेति । राजन्यबहुवचनद्वंद्वे इत्यनुवर्तमाने संख्ये अनेन पूर्वपदप्रकृतिस्वरस्य
तत्रप्राप्त्येखर्थः । प्रक्रमणादिति । प्रक्रमादित्यर्थः । प्रकरणादितियावत् । ग्रामादिकमेवेति । समा

हा

१०१ हारदृिगाविसर्थः। संख्यापूर्वो रात्रमिसस्य पाति प्रसनविधि लक्षणभानुरोधेनसमाहारद्विगो वेपप्रवृत्तेः
० भविष्यतिमर्यादेतिसूत्रे त्रिंशाद्यात्रः पंचदशगानरति भाष्यप्रयोगेतु त्रिंशत्पंचदशरात्रा अयोयस्मि
न्निति बहुव्रीहिरध्ययनवेतिप्रयोगदिभागा तसमासांतो बोध्यः। पृषोदरादित्वाद्वकारदूलिरू
श्चितू। पौनरुक्त्यपरिहारायाह। सुदिनशब्दइति। सुदिनास्त्विति। प्रशस्ताहनित्यर्थः। पथ्यलइति
ए दिहात्मनेपदेविधिपथ्यलइतिमतेनेदं। माधवेनोत्तमपि। अभारुचिबीजं तूक्तं। दिनपथर
सस्यपरवल्लिंगतापचादलात्पुरुषेप्रवृत्तिस्तत्रेपप्रवृत्तो चापचादलमिति अन्यो न्याश्रयापत्त
त्रवोध्यः। तस्माद्विपथाः निपथे सादा वर्धनानमिध्यतिपक्षो काश्यपलाल्लिंगस्यालिंगमस्ति
ष्युनितिन्यायेनसिद्धमितिबोध्यं। एवंच व्यथो विपथकापथेत्याविसमंगसं। द्वितीयेति।
क्रियाविशेषणादिति शेषः। ज्योतिष्टोमेनेति। तदभिन्नेनयागेनेष्टंभावयेदितितन्नबोधात्
नास्तिव्येदिति। कर्मभूतफलांशाभावेन द्वितीयानापत्तेरित्यर्थः। कथंतदुपपत्तिस्तदाह। तत्रा
पीति। प्राप्यमानत्वादिति। तेषां धात्वर्थंवि वक्षत्वेत्यर्थः। ज्योतिष्टोमाभिन्नयागकर्णिकामि

320

स्वविषयां भावनोपस्थेदिग्यचच्छिप्रानः। तथाबोधानुमानेनाह। अन्यथेति। पुंस्त्वमेवेति। अ
दिशाब्दस्यनित्यपुंस्त्वात्। इतितत्पुरुषः। ननुप्रथमादिविभक्त्यर्थेऽसत्तु चितमन्यपदा
र्थेऽतिसूत्रात् पदेन सबंधमिस्यत आह। पदेनहीति। तत्रविभक्त्यार्थाः क्रियासंबंधंतभावेन
प्येकार्थीभावांगीकारान्नापि च गुर्वदत्तइत्यादौ सामानाधिकरण्यानुपपत्तिरित्यन्यपदविस्तरः
। तस्यापि। सद्वाक्यस्यापि। अयमेनेति। कर्मग्रामएवेत्यर्थः। भिन्नेवेति। प्रत्ययार्थस्यप्रकृत्यर्थे प्र
तिविशेषणतानिषयेत्यर्थः। नहीति। तस्माद्विशेषणीभूतकर्तृत्वस्या भेदान्वयइति सुपसंतर
मंगीकार्यं। बहूनामिति। सामान्येनोक्तमपि विशेषतोनिरूपयति। चकारादीति। आदिनाकानां
द्यर्थसंग्रहः। तेषांनिषेधोऽभावः तद्वोधकलोपश्चनकार्यमित्यर्थः। बहुसुपत्वाति। प्रत्ययादिरापा
न्यादिसुपत्वाल्यर्थः। कृतेत्यमिति। इदमुपलक्षणं। विभाषाधिकारादिनामपि। न्यायपत्त इति। ता
दृशार्थो नाम्नापेक्षैकार्थीभावांगीकारादित्यर्थः। विशेषणत्वेनैवोपस्थितेर्विशेषणाद्यन्वयोऽपि

329

सू०१०
६

स्यन्यत्र विस्तरः। समासेनाभिहितत्वादिति। एवं च तेषां कर्मत्वादिरूपतेनाप्तिविभक्तिवाच्यतापरेऽउक्त
रूपेण कर्मादीनां कर्मादिशब्दैरिवैतैरप्यभिधानादिति भावः। व्यक्तिरिति। अनपत्यकादाविव नाम्ययो भा
वादिसंज्ञया अस्याबाधादिति भावः। उत्तरपदलोपश्च स्यन्त्रोपदर्शयन्निवान्यइति स्कन्धमिति मुख्या
म र्थेतु समासोनभिधानादिति भावः। पुनर्वनारंभ एव बुन्मायान् नासिध्येदिति। नानिश्चेतिनिषेधस्तु नात्र
निषेधविषये एव पुंवत्कर्मधारयेत्यस्य प्रवृत्तेः। किंसमानेभ्यन्तरे स्त्रीति पञ्चमी निर्दिष्टत्वात् परोयः प्रत्य
यः तदंतेसन्निषेधोनापत्तथा। एवं न स्यस्वभिमाने बहुव्रीहाववियेऽउविऽभार्येत्यत्र भाष्ये उत्तर
स्त्रीदाहरणं तु तत्राप्ययमेवार्थ इति स्वविद्युमेऽउविऽस्यानंतरापुपत्ये भाष्ये नतोत्पातिता
भार्यावन्‌॥ प्राचां मनुरोधनेति॥ तद्धितश्चेवीजं तु प्राग्‌उक्तार्थकभाविन पुंस्कादित्यस्याप्रसिद्धे
स्तथाप्यचनपाठरति॥ अत्रउः समानाधिकरणे इत्येवं रूपः पुमानयस्मिन्निति॥ प्रवृत्तिनिमि
त्तस्याधारत्वविवक्षायां सप्तमी॥ सप्तमी वा यस्मिन्नर्थे सति पुमान्भाविनाभवतीत्यर्थः। स्त्री
प्रत्ययेनिस्यारितत्वमतिसयासमासमित्यर्थः॥ अतः परस्मिन्निति निनीत॥ उत्तरपदपरत्वनि

मित्तत्वारस्यानिवृत्ते रिति भावः॥ प्रवर्त्तने निमित्तवर्त्तेनेत्यर्थः॥ ●अस्त्रियामिनीति तद्दा
जस्य बहुष्विति सूत्रात्तत्र नदनुवर्त्तेरिति भावः। पूर्वसवर्णदीर्घेनेति पूर्वशब्दे स्पष्ट
स्वारः पाठः समासात्पूर्वेनसवर्णदीर्घ इत्यर्थः। पूर्वसवर्णदीर्घेत्यपपाठः दीर्घान्जसी
तिनिषेधात् इत्थं भवतीति पूर्वपदं वाक्षिप्यतइत्येवमेवेत्यर्थः। चतुर्णीद्वंद्वरिति उपक्र
कभाष्यतत्स्वार्थे चलाभादिति भावः। एतेन नवंतद्वंद्वं रूलोपत्तशब्देनरोपदस्यपारत्वं।
पूर्वपदस्मिति येनानऽस्यादिति शेषः। लिंगविशिष्टपरिभाषयेति। जरद्भ्यस्य
प्रथमादिद्विपस्यातेनेविशिष्टलिंगविशिष्टपरिभाषया जरतीशब्दस्यापिग्रह
णेनोपसर्जनत्वमिति जरत्याः पूर्वनिपातइति तेषु बहुव्रीहौ नान्वयः। विद्येपात्तरमिति। पत्रमः स्योधर्मा
यस्येति त्रिपदबहुव्रीहो आनिज भावन्वरूपमित्यर्थः। महाभेदइति। पदितु कर्मधारयोत्तरपदेबहु

श्री हे नीलपदस्वरः सिध्यतीत्युच्यतेत दाक्षित्यमेव प्राचीनोदाहृतमिति भावः। तत्करोतीति। प्रमाणं
प्रमां करोति जनयतीत्यर्थः। किं वं तस्येदमिति। सवर्णदीर्घप्पुत्रादेरकृतिगणत्वात्पूर्वो ध्वः। आग
तिकगतिरिति। भाष्यानुक्तत्वादिति भावः। प्रत्ययाश्रयइति। तेन लोपस्य बहिरंगत्वेनासिद्ध
त्वान्नलुक्प्राप्तिरिति भावः। गोधेरइति। स्त्र्यादितेशब्दयोः प्रत्ययावयवत्वे णित्स्वप्तत्वाभा
वादिति भावः। विरोधात्त्वेति। येन तु कोपि प्रत्ययापेक्षत्वेन त्स मत्वमित्यस्यसंग्रहः। ततस्त्वेति
। तस्यास्तस्यामित्यर्थः इदं। निल्लिति। लिंगविशिष्टपरिभाषयेति भावः। परिगणनसामर्थ्यादिव
भातिश्वेति निषेधाप्रवृत्तिरिति बोध्यं। कैयटइति। अनेनाहि कैयटेन भेदकधर्ममात्रगुणत्वस्यानि
रासेन मद्रुक्तस्य शुक्लादिरूपस्य गुणस्य ग्रहणं सूचितं। अत्राकृतिबीजं तु संज्ञा जातिरूढं तत
द्धितोनसमस्तसर्वनामसंख्या शब्दातिरिक्तः शब्दो गुणवचनः शब्दइत्याकरस्तु चरूढभाष्यविरोधः

अयं च सर्वनामेति तस्पष्टमेव। प्रगृह्यसंज्ञेति। इग्यणइति सूत्रे उभयसंज्ञात्वस्येति भाष्यप्रयो
गोपि मानं। तस्य समरूपत्वेनाप्य गुणवचनत्वं बोध्यं। कृतार्थेनेति। कृतार्थं तु रूपद्वीलदर्के
क्रियाद्रारूपं इति भावः। समस्तेनैत्वपि बोध्यं। आख्यानइति। द्वारवतीति संज्ञापि नेत्यादि
मुतदीयोऽर्थ इति आख्यात् पि व्योरिस्मात तेन संज्ञाद्रव्यत्वात्। भाष्यरीत्यात द्धितांततत्वेनागुण
वचनत्वाच्च। तेवेतिक्त्वस्त्रक छंदस्येवेति बोध्यं। शेदितेयइति। पुंवद्भावे सिद्धस्थापत्यमभिधानि
त्वनाश्रित्येदं। तदाश्रयेतु रोहितिरित्यापत्ति बोध्या। संस्कारविद्वेष्यइति। नद्धनीत्यर्थः। पसेते
ति। लिंगविशिष्टपरिभाषयेत्यर्थः। इत्य विरोधइति। एवं च माधवानुसारेणायं किलिखितइतिसूचि
तं। रूढार्थं चेति। तत्र तदर्थमिदं निपातनं नत्विवाहनिबंधनपतिशब्दघटितस्य तस्य स्त्रियां वर्हित
पुरुषविवाहितस्त्रीमात्रबोधकत्वेनाप्याबोधकत्वेनातिप्रसंगाभावेन रूढिकल्पनेमानाभा
वात्। तस्याभार्यात्व पुंस्त्वेन उंवत्वाभास्यापुंवत्वबोधनार्थमिति न्यासयंभासेगते। किंतु

तृतीयस्य। सह्येयोगमर्थे प्रवृत्तिनिमित्तक एव शब्दो लोके व्यवहारेण समुदायेऽप्याख्येनत्व
स्त्रीविषयोऽपेक्षमध्यमस्य पत्नीशब्दस्यापेक्षत्वमितिभावः। अत एव समानस्वामि
कदास्योर्न तथाव्यवहारः कृतिसिद्धानाभ्यवहारस्य गौणः। किंच विवाहनिबंधनः प
तिशब्दो नास्त्येव॥ स्वामित्वेनैव दृष्टस्य बोधकः॥। स्वामित्वं च प्रकरणादिना यच्छब्द
लोनिरूपितं कदाचित् बुध्यते तथ्यन्तस्य पुंवद्भावबाधकत्वे दूषणात् तस्माह॥
किंचेति॥ सापत इतिप्रापस्येति॥ अदृष्टइत्युच्यते तत्र सापत्नेपुंवत्त्वंप्राप्नोति॥
एवं च सापत इतिप्राप्नोतीति भाष्यकैयटयोरुक्तं॥ तृतीयस्याहि भाषित
पुंस्कत्वे नपुंवत्वापत्तिः॥ सहिसमानस्वामिकत्वेन पुंमास्समप्याह॥ पुंव
त्वबाधेहितदसंगतिः स्पष्टैव॥ किंचाविवाहनिबंधनसत्वेनस्याभाषितपुंस्क
त्वेनतस्मादप्यसापत्नेसिद्धेस्तदसंगतिः॥ नचसापत्नएवनसिध्यतिसाध्यत्वादपि

प्राप्नोतीतिभाष्यार्थ इति वाच्यं। द्वितीयसतेरूढत्वेन तस्यैव ङीबादौ ग्रहणे तृतीयादणे
भावेन माधवरीत्यासापतप्राप्तेरितिदिक्। केवलयौगिकस्याग्रहणेनेति। केवलयोग
मात्रलभ्यसमानपतिकत्वरूपप्रवृत्तिनिमित्तकत्वेनेत्यर्थः। तेनैवसाविवाहितपतीति
वाहितांस्त्रियमाह। ननुतत्वेनव्यक्तिविशेषस्यबोधनात् रूढत्वमर्थं निपातनेमुक्तं। अत
एवास्य भाषितपुंस्कत्वमितिभावः॥ यद्वा केवलयौगिकपदविद्याव्युत्पादितस्येत्य
र्थः॥ एवं हि तत्र सिद्धान्तभाष्ये। सापत्नः॥ प्रकृत्यंतरत्वात् सपत्नशब्दः प्र
कृत्यंतरमस्तीति॥ अस्यार्थः॥ अन्या प्रकृतिर्यस्य स प्रकृत्यंतरस्त
त्वादित्यर्थः॥ प्रकृत्यंतरमाह॥ सपत्नशब्द इति॥ अत्राणनिरूपित
प्रकृत्यंतरत्वं सपत्नशब्दस्य शब्दमर्यादया लभ्यते न तु ङीन्निरूपितं॥
लक्षणया तथाव्याख्यानेन चनमानं॥ एवं च सपत्नीतिगणपाठनाश्रि
त्यसपत्नप्रकृतिकसपत्नीशब्देन सापत्नसिद्धावपि सापतीतिप्राप्नोतीति

पु०उ०२· त्वेऽसंमतापत्तिर्गौणेन स्यान्नते । किंतु भिन्नः सपत्नशब्दः तदापि लिंगविशिष्टपरिभाष
याऽनित्यत्वादप्रवृत्तिः स्यादिति । बाध्यसामान्यचिंतायां ह्रीभादिपाठोढकोपि बाधकइत्युक्त
त्वन्यः । एवं च केवलयौगिकपतिशब्दघटितस्य ग्रहणं नेति स्पष्टमेव । एवं च रूढे द्वि
तीयसपत्नीशब्दे सुसाधनं माधवानुरोधेन तदेव ध्वनयता । पत्नुपारक्षणइत्यादि
नामाधवग्रंथमुपन्यस्य तत्र द्वितीयसपत्नीशब्दमादाय विरोधाभावस्योपपादितः॥
सापत्न्यमिति प्रयोगस्तु सपत्नप्रकृतिकादेव ब्राह्मणादित्वात्ष्यञि बोध्यः॥
सपत्नप्रकृतिकोपि द्वितीयसपत्नीशब्दार्थ एव । तत्रैव लोके न प्रयोगात्॥
रूढयोरेव ग्रहणादित्यस्य सपत्नशब्दस्य लिंगविशिष्टपरिभाषया तत्प्रकृति
कत्वेऽनित्यत्वेनेत्यर्थः तयोः शुद्धरूढत्वात् । तृतीयस्तु योगरूढः । अन्यथा स्यापि
स्य यत्र रूढस्य केवलग्रहणे बीजाभावः । मध्यमाधमयोरिति । व्याख्यातृणां मध्यमस्य १६४

रूढिघटितस्य शुद्धयौगिकस्य ग्रहणे ऽस्य रूढस्य कथं प्रयोगः स्यादिति स रूढयोर्वि
भावयेत्तु । संनिपातपरिभाषयेति । ढादिषु अकारस्योच्चारणार्थत्वेन । त्विष्यितया
रुत्वाभिव्यक्त्यायोगाच्चेत्यपि बोध्यं । निष्कर्षे त्विति । वार्तिकभाष्योक्तस्यापि सूत्रसं
मतत्वमनेनेति निष्कर्षे त्वित्यर्थः । अत एव सूत्रेण सिद्धत्वाद्देव । प्रकरणोक्तस्येने
ति । अनंतरस्येति न्यायादिति भावः । असमासविहितत्वादिति । दक्षिणोत्तराभ्याम
तसुच्च दिङ्सामान्यं तरालेदित्यनयोः सूत्रयोर्भाष्ये पाठादिति प्रोक्तः । तद्धितेऽस्य
चेत्सु पुंवत्तिस समासः । निर्विषयं स्यादिति । पुंवत्त्वेनापि निरवृत्तेरिति भावः । अथा
संवेति । पूर्वोत्तरसोरिति नियमार्थं तद्धिते सर्वनाम्नः पुंवत्त्वे तद्धितस्य लोप
वेति अतो मयट्प्राप्तेऽनिष्टमेव पुंवत्त्वमिति । तत्र दक्षिणोत्तराभ्यामतसुजितिसू
त्रस्थभाष्यविरोधात् । अन्यत्वपरत्वे । तदुक्तं प्रथमतरविमयट् । ब्राह्मणीपूर्वेति ॥

०द्वा०र०
१८५
सर्वनाम्नास्समासस्सत्वेन पूर्वस्य ब्राह्मणीत्यादि: पुंवत्वापत्तिरिति भाव:। उक्तोदाहरण
योरिति। संज्ञोपसर्जनघटितोदाहरणयोरित्यर्थ:। तत्र सर्वनामसंज्ञकत्वस्ये
वाभावेन लक्षणाव्याप्त्यर्थेति भाव:। अतिसर्वो शब्दस्येति। उपलक्षणमिदं संज्ञा
या अपि। अतिकेशीति। वृत्तौ वृत्ते: प्रागित्यर्थ:। वैयाकरणभार्येइति नखमुखात्सं
ति सूत्रस्थं यदुदाहरणं तदनुरोधेनेदं। भाष्य इति। नक्रोपधाया इति सूत्रस्थभाष्ये इत्य
र्थ:। इत्युक्तेरिति। हस्तिन् शब्दस्यादंतत्वाभावेन ततो जातिलक्षणङीषो प्रा
प्तेरिति भाव:। टाबादिरिति। इउपविड्भार्यस्त्रीइउपविड्स्या भार्यायस्येत्यर्थे स
मासे एतन्निषेधाभावेन पुंवत्वं भवत्येवेति भाव:। अनङ् इत्यस्य पर्युदासत्वे
उपविड्भार्यादारिकेति निषेधविषयोत्तरसूत्रविषयकर्मधारये उदाहरणात् बहु
व्रीहावीदृशे पुंवत्वनिषेधइष्टएवेति तु न भाष्ये उत्तरत्रापि तदनुक्तेस्तत्रापीदृश १८५

र्थं फलमिति ध्वनयितुं तथोक्ते:। इउपविड्दारनेतरापत्यत्वेभाष्यमते जातित्वाभावा
च्च। प परस्येरिति। ब्राह्मणीत्यत्र हितेनापि ङीनिषेधोक्तइति भाव:। यदितु त ङी वि
ति पाठस्तदा करविरोधो बोध्य:। सामानाधिकरण्यस्येति। दत्तागार्ग्योस्समासेपि नइत्यत्री
तदाहोपन्यास इत्यादि। उच्चारणार्थ इति। तन्मात्रार्थ इत्यर्थ:। फलाभावेन तत्परस्त्वान
तेरिति भाव:। प्रत्यारव्यातमिति। अव्यावर्तकत्वात्तस्या अग्रहणं तस्याविशिष्टरूपोपा
दानविषयत्वाच्चेत्सर्पिबोध्यं। विद्यमानत्वाच्चेति। दत्तागार्ग्योर्विद्यमानत्वेइत्य
र्थस्तत्फलितमाह। दत्ता स्विति अव्यभिचारादिति। पूर्वाण्हस्यसाहचर्ये सह पूर्वाण्हमित्या
दावपि अव्ययस्य प्रथमानिर्दिष्टत्वेनोपसर्जनत्वमस्त्येवेति भाव:। अव्ययपदहरणमि
ति। समासस्योपसर्जनत्वासंभवादिति भाव:। यद्यपि सहकृतप्रियस्यादौ समासस्य
उपसर्जनत्वसंभव: तथापि तत्स्थानुसारादेवं व्याख्यानं बोध्यं। उपसर्जनसर्वनामत्व

शा०र०

३६

स्येति। कश्चिदवयवः सर्वत्रोपसर्जनमेवेति विशेषणसामर्थ्यादेतल्लाभः। तादृशस्य ब
हुव्रीहेर्वेति आह। बहुव्रीहेरिति। व्याख्यानादिति। अत्रोपसर्जनपदेन लौकिकं गृही
य्यते न तु पारिभाषिकं तेन स्वपुत्र इत्यादावपि उपसर्जनसर्वनामत्वं बोध्यं। सपूर्वाया इ
ति। एतच्च स्वपदविरोधेन। अत्र सह विद्यमानः पूर्वो यस्या इति अनेकमन्यपदार्थ इति ब
हुव्रीहिरित्यन्ये। अन्यथा नाधिकेति। अव्ययादेरित्युक्तत्वादित्यपि बोध्यं। अत एव गौर
श्वादिरित्यादौ न स्वन्नियम इति। नचैवं तद्वचने सहशब्दस्य तत्सामानाधिकरण्यात् तेन
चैकदेशेन तायस्य सर्वंकेन तात्मक इति सिद्धं। समासविशेषणत्वे बहुव्रीहिर्न स्यादिति
त्वाद्दोषः स्यादेव। उपलक्षणमिति। स्पष्टं चेदं गतिश्चेति सूत्रे भाष्ये। अभ्यासीत्या
दि। अन्येनानये स्यत्राप्याप्तिः प्रतः पूर्वस्यत्रातिव्याप्तिरिति भावः। सामानाधिकरण्यासं
भवादिति। यद्यपि प्रातः कल्पमित्यादावपि विशेष्यत्वेऽपि तिमात्र धानत्वं संभवतीति तथापि १६

प्रातःकाले स्वरूपतः शोभनत्वस्य निरूपयितुमशक्यत्वात्तत्र प्रयोगाच्च कर्मेपर्यैतं
कृत्स्नेनेति बोध्यं। व्यावृत्तीति। मध्यमध्यम पूर्वपदत्वं। यत्पूर्वपदं ततः परत्वं न ध
र्मत्वं शब्दस्येति भावः। पूर्वपदाक्षेप इति। यौगिकपूर्वपदाक्षेप इत्यर्थः। पक्ष्यतः तत्कृ
त्वं विस्म्। आकृत्स्नेति। केवलपदस्युक्तौ पौन्स्कुदुर्भावी केवलाभ्यामित्यादौ च सजा
तीयान्याभावेऽप्येतद्योगेण तद्गुणाभेनाभावादिति भावः। एतच्च मात्रेदीति सू
त्रे भाष्ये स्पष्टं। निरतिधर्मेति। प्रवृत्तिधर्मस्य स्योपलक्षणं। क्रममिति। तेभ्येदृतैः
सुतं आभिषुतं सोमं पिबेतीत्यर्थः। प्रसुखं गतइति। रूपकेणेति शेषः। इति शब्दादि
ति। लौकिकविवक्षानुसारत्वात्तस्येति भावः। कर्मव्यतिहारः परस्परग्रहणादिः।
अव्ययीभावत्वमिति। तेन तस्याव्ययत्वं बोध्यं। एतच्चच्छापादिसामान्यादा ह

शा०२ा०२ नं। एवंच स्वरार्थमपीति। इदं सान्निदिष्टस्वरबलीयस्त्वाभिप्रायेण न। यदि तूपजीव्यते
न बहुव्रीहिसंज्ञया समासे समावेशोपि सति शिष्टस्वरबलीयस्त्वेनाव्ययीभावतत्पुरुषसमा
१८७ सान्तोदात्तत्वेनासिद्धिरिष्टस्येति तदापूर्वमेव क्रमो न न्याय्य इति बोध्यं। समावेशफलं तिष्ठत्स
मास्यप्यतत्वोः सिद्धिः। तत्रैतेनेदमिति अव्ययीभावप्रकरणे ज्ञापितत्समासोऽत्र प्रकरणे
एव तु न कृतः। द्विदंडादिभ्यश्चेति अनेनैव द्व्यस्य कृतत्वात्पार्श्वे। विभाषाद्विरोधेति। द्व
द्व्यादिरूपान्यपदार्थरूपेत्यर्थः। उभयाहस्त्याभरेति। इदं चेदं भाष्ये यद्यपि उभाभ्यां पाणि
हस्ताभ्यामाभरेति व्याख्यातं। तथापि समुदायनिपातनादेव बहुव्रीह्याधिकारेपि
तत्पुरुषादयः अव्ययत्वाभावान्नोत्तुक्। इदमपि श्रयपत फलं बोध्यं। आश्लिष्येति।
आरोप्येत्यर्थः। स्वतंत्रोपीति। जानुवाचीत्यर्थः। उपज्ञु इति। जानुसमीपमित्यर्थः। ए

384

कदेशत्वे तस्यापि वरणं। अविभागेनेति। अवयवावयविनोर्हि अविभागलक्षणं ता
दात्म्यमेव संबंधः। एवं प्रकृतेपीति। इत्येवमुक्तं तथ्यन्वयमन्याह। एकं च गुणेति। गुणोपसर्ज
नद्रव्यवाचिनः इत्यर्थः। एतद्वृत्तिविषयमेव गंधस्येतादृशात्वमिति न कृत्स्नगुणेति सूत्र
स्यत्वत्वं प्रभाविरोधः। एतदेवाभिप्रेत्य भाष्ये कृपरयोरुत्तं कुंकुमाद्यनुलेपनमपि द्रव्य
तादेव विभागापन्नानि लीनं यदि विवक्षिते तदा सुगंधि द्रव्यमित्यत्र इति विभागेनावस्था
नेतु सुगंध इतीति। न तु इथेति। चेदं न तस्यान्तिति विशिष्टद्रव्येत्यर्थः। सुगंधिर्वायुरित्य
त्रापि गंधाश्रयाणूनां तत्संसर्गानां चाविभागात् तेषामेव ग्रहणमिति न दोषः

२०२०
८

लघुशब्द रत्नाकर